9)

॥ श्रीः ॥

श्रीमत्परहंसपरिव्राजकाचार्य-
शंकराचार्यविरचिता ।

अपरोक्षाऽनुभूतिः ।

श्रीस्वामीविद्यारण्यमुनिकृतया
दीपिकया,
श्रीयुतभोलानाथात्मजपण्डितरामस्वरूप-
द्विवेदिकृतभाषानुवादेन च समलंकृता ।

खेमराज श्रीकृष्णदास,
अध्यक्ष-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
बम्बई.

संवत् १९९४, शक १८५९.

मुद्रक और प्रकाशक-
खेमराज-श्रीकृष्णदास,
मालिक-"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस, बम्बई.

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेङ्कटेश्वर" यन्त्रालयाध्यक्षाधीन है।

Dr. B. N. Pandit, Shastri
M. A. M. O.
Ph. D. In Kashmir Saivism

भूमिका

प्रगट हो कि कलिकालमें पुरुष अनेक दुःखोंसे दुःखित रहते हैं और सब ही चाहते हैं कि हमारा दुःख दूर हो जाय इस विषयमें विचार यह है कि संसारके दुःख यद्यपि क्षण घडी महीना वर्ष इत्यादि नियमित कालके लिये औषध मंत्रादिकोंसे भी दूर हो सकते हैं परन्तु अत्यन्त नाशको प्राप्त नहीं होसकते कि जिससे दुःखसागरसे पीछा छूटे, क्योंकि मुक्ति तौ ब्रह्मज्ञानके विना कदापि नहीं हो सकती, जैसा कि यजुर्वेदकी श्रुतिका अभिप्राय है—"तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" उस ब्रह्मका ही साक्षात्कार कर मुक्तिको प्राप्त होता है अन्य कोई उपाय मुक्तिके प्राप्त होनेका नहीं है। इस प्रकार संसारको क्लेशित देखके श्रीपरिव्राजकाचार्य्य श्रीमच्छंकराचार्य्यजीने अपरोक्षानुभूतिकी रचना की, जिसमें संक्षेपसे वेदान्त प्रक्रिया सरलरीतिसे वर्णन करी है और इसकी संस्कृतटीका भी हुई है, परन्तु ऐसे पुरुष बहुत कम होते हैं जो कि मूल अथवा संस्कृतटीकाको भी समझ

सकैं और जो समझ सकै हैं उनको तौ संस्कृतटीकाका भी कोई काम नहीं है, केवल संस्कृतका किञ्चिन्मात्र ज्ञान रखनेवाले सत्पुरुषोंके अर्थ इस पुस्तककी स्वरूपप्रकाशिका नामवाली भाषाटीका अति स्पष्ट बनाई है, इस मेरे श्रमको देख सज्जन पुरुषोंको अवश्य अह्लाद होगा।

श्रीयुत भोलानाथात्मज पण्डित रामस्वरूप द्विवेदी.

श्रीः ।

अपरोक्षाऽनुभूतिकी अनुक्रमणिका ।

विषय.	पृष्ठ.
मंगलाचरण	१
अनुबन्धका निरूपण	३
वैराग्यका स्वरूप	५
वस्तुविवेकका स्वरूप	६
शमदमका स्वरूप	७
उपरति और तितिक्षाका स्वरूप	"
श्रद्धा और समाधानका स्वरूप	८
मुमुक्षुताका स्वरूप	९
ज्ञानकी आवश्यकता	१०
विचारका स्वरूप	११
अज्ञानका स्वरूप	१४
आत्माका प्रकाशत्व	१७
मूढका लक्षण	१९
ज्ञानका स्वरूप	२०
शून्यवादका निराकरण	२३
देहात्मवादका निराकरण	२४
कर्मकाण्डियोंका अभिमत	२८
लिङ्गदेहकी अनात्मता	२९
देहात्मवादका उपसंहार	३०
आत्मदेहविभागमें शंका	३१
समाधान	"
देहभेदका असत्व निरूपण	३२

विषय.	पृष्ठ.
चितिकी विश्वाकारता	३२
प्रपंचमें ब्रह्मकी उपादानता	३३
भेदभावकी असत्यता	,,
भेदभावमें दोष	३४
ब्रह्मसे जीवोंकी उत्पत्ति	३५
ब्रह्मकी व्यापकता	,,
जीव-ब्रह्मैक्यमें दृष्टान्त	३६
भेदभावमें भीति	,,
अज्ञानसे द्वैतकी प्रतीति	३७
अद्वैतभावसे लाभ	३८
अद्वैतकी पुष्टिमें श्रुतिप्रमाण	,,
प्रपंचके मिथ्यात्वमें दृष्टान्त	३९
अवस्थात्रयका मिथ्यात्व	,,
जीव-ब्रह्मकी एकतामें दृष्टान्त	४०
ब्रह्ममय संसार	४१
संसारकी स्थिति	,,
ब्रह्ममय व्यवहार	४२
विश्व और ब्रह्ममें कार्यकारणता	४३
आभासमें द्वैविध्य	४४
आत्मानात्मविभागका मिथ्यात्व	४५
देहतादात्म्यका निरूपण	,,
आत्मामें देहत्वका निर्णय	४७
ज्ञानसे देहाध्यासकी निवृत्ति	५०
आत्मविचारकी कर्तव्यता	५४
प्रारब्धकर्मका निराकरण	,,
ज्ञानसे प्रपंचकी निवृत्ति	६१

विषय.			पृष्ठ.
अज्ञानियोंके लिये प्रारब्ध	....	....	५५
ज्ञानियोंको प्रारब्धका अभाव	....	....	५६
प्रारब्ध माननेमें दोष	....	....	”
निदिध्यासनकी आज्ञा	....	....	५८
निदिध्यासनकी आवश्यकता	...	...	५९
निदिध्यासनके अंग	....	....	”
यमका निरूपण	....	....	”
नियमका निरूपण	...	....	६०
त्यागका निरूपण	....	....	६१
मौनका निरूपण	....	...	६२
देशका निरूपण	....	....	६३
कालका लक्षण	....	....	”
आसनका निरूपण	....	....	६४
सिद्धासनका लक्षण	....	....	”
मूलबन्धका निरूपण	....	....	”
देहसाम्यका निरूपण	....	....	६५
दृक्स्थितिका निरूपण	....	....	”
प्राणायामका सामान्य लक्षण	....	....	६६
रेचक और पूरक प्राणायाम	....	....	६७
कुम्भकप्राणायाम	....	...	”
प्रत्याहारका लक्षण	....	....	६८
धारणाका लक्षण	...	...	”
ध्यानका लक्षण	....	....	६९
समाधिका लक्षण	....	....	”
निदिध्यासनकी अवधि	....	....	७०
निदिध्यासनका फल	....	....	”

विषय.			पृष्ठ.
समाधिमें विघ्न	...	....	७०
बन्ध-मोक्षमें वृत्तिकी कारणता	....	...	७१
अब्रह्मवृत्तिवालेकी निन्दा	...	...	७२
ब्रह्मवृत्तिवालेकी प्रशंसा	...	....	"
ब्रह्मवृत्तिवालेकी मुक्ति	....	...	"
केवल शब्दवादियोंकी निंदा	...	....	७३
ब्रह्मनिष्ठोंकी वृत्ति	....	....	"
वेदान्तसिद्धान्तका निरूपण	....	....	७४
ब्रह्मभावनासे ब्रह्मत्व	....	....	७६
प्रपंचमें ब्रह्मरूपकी भावना	....	...	७७
राजयोगका उपसंहार	....	...	७८
राजयोगके अधिकारी	...	....	"

इति विषयानुक्रमणिका समाप्त।

श्रीः ।

अथ अपरोक्षाऽनुभूतिः ।

संस्कृतटीकया भाषानुवादेन च सहिता ।

मङ्गलाचरण ।

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥

श्रीगणेशाय नमः ॥ स्वप्रकाशश्च हेतुर्यः परमात्मा चिदात्मकः ॥ अपरोक्षानुभूत्याख्यः सोऽहमस्मि परं सुखम्॥१॥ ईशगुर्वात्मभेदाद्यः सकलव्यवहारभूः ॥ औपाधिकः स्वचिन्मात्रः सोऽपरोक्षानुभूतिकः ॥ २ ॥ तदेवमनुसंधाय निर्विघ्नां स्वेष्टदेवताम् ॥ अपरोक्षानुभूत्याख्यामाचार्योक्तिं प्रकाशये ॥ ३ ॥ यद्यपीयं स्वतः स्पष्टा तथापि स्वात्मसिद्धये ॥ यत्नोऽयं सोऽपि संक्षेपात्क्रियतेऽनर्थनाशनः ॥ ४ ॥ क्वाहमुल्काकरः क्वायं सूर्यस्तेजोनिधिः किल ॥ तथापि भक्तिमान्कः किं न कुर्यात्स्वहिताप्तये ॥ ५ ॥ तत्राचार्याः स्वेष्टपरदेवताऽनुसंधानलक्षणं मंगलं निर्विघ्नग्रंथसमाप्तये स्वमनसि कृत्वा शिष्यशिक्षायै ग्रंथादौ निबध्नंति-श्रीहरिमिति॥अहंतं नमामीत्यन्वयः॥अत्रेयं प्रक्रिया,पदार्थौ द्विविधः—आत्माऽनात्मा चेति । तत्रात्मा द्विविधः—ईश्वरो जीवश्चेति । एतावपि द्विविधौ शुद्धाऽशुद्धभेदात्।तत्राऽशुद्धौ मायाऽवि-

द्योपाधित्वेन भेदव्यवहारहेतू, शुद्धौ त्वभेदव्यवहारहेतू । तथाऽनात्मापि त्रिविधः कारणसूक्ष्मस्थूलभेदात् । एतदेव शरीरत्रयमिति व्यवह्रियते । एवं चिज्जडरूपवैलक्षण्यात्तमःप्रकाशयोरिव विभक्तयोरुभयोरात्मानात्मनोरविवेक एव बंधकारणम् । तयोर्विवेकस्तु मोक्षकारणमिति दिक् । तत्र तावदहंशब्देन देहत्रयविशिष्टत्वेनाशुद्धो जीवः अस्यैवाऽकृष्टत्वात् तं नमामि, तं मायातत्कार्यहन्तृत्वेऽपि तदाश्रयभूतत्वेन सर्वकारणं वेदांतप्रसिद्धमीश्वरम्, एतस्यैव सर्वोत्कृष्टत्वात् नमामि नमस्करोमि स्वात्मत्वेनानुसंदधामीत्यर्थः। तस्यैव सर्वोत्कृष्टत्वेनानुसंधानयोग्यत्वमाह—श्रीहरिमिति । श्रियं दधानमित्यर्थः । यद्वा स्वाश्रयतया श्रियते स्वीक्रियते प्रलयसुषुप्त्यादौ सर्वभूतैरिति श्रीर्जीवत्वोपाधिभूताऽविद्या तां हरत्यात्मज्ञानप्रदानेन नाशयतीति श्रीहरिस्तम् । यद्वा स एव सर्वाधिष्ठानतया श्रीरित्युच्यते । श्रीरेव हरिस्तम् । ननु किमनेनाऽविद्यातत्कार्यहरणेनेत्याशंक्य परमपुरुषार्थप्राप्तिर्भवतीति सूचयितुं तस्य परमानन्दरूपतामाह—परमानंदमिति । परमोऽविनाशित्वनिरतिशयत्वाभ्यामुत्कृष्ट आनंदः सुखविशेषस्तद्रूपमित्यर्थः । तर्हि वैषयिकसुखवज्जडः स्यादित्यत आह—उपदेष्टारमिति । आचार्यद्वारात्मसुखोपदेशकं चिद्रूपमित्यर्थः। ननु केवलानंदस्य कथमुपदेष्टृत्वमित्यत आह—ईश्वरमिति । ईष्टेऽसावीश्वरः विचित्रशक्तित्वात्सर्वसमर्थस्तं नमामीत्यन्वयः । एवमपि परिच्छिन्नत्वात् घटादिवदनात्मत्वं स्यादित्यत आह-व्यापकमिति । स्वसत्ताप्रकाशाभ्यां नामरूपे व्याप्नोति स व्यापकस्तं परिच्छेदकस्य देशकाला

देर्मायिकत्वादनंतमित्यर्थः । ननु व्याप्यव्यापकभावेनानंतत्वमसिद्धमित्यत–आह सर्वलोकानां कारणमिति । अभिन्ननिमित्तोपादानमित्यर्थः। "सत्यं ज्ञानमनंतं ब्रह्म" "आत्मनात्मानमभिसंविवेश" इत्यादिश्रुतेः ॥ १ ॥

परम आनन्द स्वरूप श्रेष्ठ उपदेश करनेवाले संसारके स्वामी सर्वव्यापी ब्रह्मादि सर्व सृष्टिके आदि कारण श्रीविष्णु भगवान्‌को प्रणाम करूँ हूँ ॥ १ ॥

अनुबन्धनका निरूपण ।

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥

इदानीं प्रेक्षावत्प्रवृत्तयेऽनुबन्धचतुष्टयं दर्शयन् स्वचिकीर्षितं प्रतिजानीते-अपरोक्षेति । वै इत्यव्ययेन विद्वदनुभवं प्रमाणयति । तथाचायमर्थः-विद्वदनुभवप्रसिद्धा या तत्त्वमस्यादिमहावाक्यश्रवणजाप्रत्यगभिन्नब्रह्मविषयाअपरोक्षानुभूतिः=अक्षाणामिंद्रियाणां परमतीतं न भवतीत्यपरोक्षमिंद्रियाधिष्ठानतत्प्रकाशत्वाभ्यां नित्यप्रत्यक्षस्वप्रकाशात्मतत्त्वं तस्यानुभूतिर्वृत्त्यारूढाखंडता । यद्वा अपरोक्षा चासावनुभूतिश्चेत्यपरोक्षानुभूतिर्विद्याऽपरपर्यायो ब्रह्मसाक्षात्कारः । तत्साधनग्रंथोऽप्युपनिषच्छब्दवदपरोक्षानुभूतिशब्देनोपचर्यते । झटित्यवलोकनमात्रेणैवोत्तमाधिकारिणां ब्रह्मात्मसाक्षात्कारकारणं ग्रंथविषय इत्यर्थः। अनेन नित्यापरोक्षब्रह्मात्मतत्त्वविशेषो यो दर्शितः स प्रोच्यते=प्रकर्षेण तत्तदाशंकानिराकरणपूर्वकं सिद्धांतरहस्यप्रदर्शनरूपेणोच्यते,कथ्यत इत्यर्थः। अस्माभिः

पूर्वाचार्यैरित्यर्थादध्याहारः।ननु प्रायः'प्रयोजनमनुद्दिश्य न मंदोपि प्रवर्तते' इति न्यायान्नारंभणीयो ग्रंथ इत्याशंक्य प्रयोजनमाह-**मोक्षसिद्धय** इति। मोक्षो नाम स्वाविद्याकल्पितानात्मदेहाद्यात्मत्वाभिमानरूपबंधनिवृत्तिद्वारा स्वस्वरूपावस्थानं तस्य सिद्धिः प्राप्तिस्तदर्थम् । अनेन सर्वानर्थनिवृत्तिद्वारा परमानंदावाप्तिरूपं **प्रयोजनं** दर्शितम् । किंलक्षणाऽपरोक्षाऽनुभूतिः ? सद्भिः=साधुभिर्नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नैर्मुमुक्षुभिरित्यर्थः। एवशब्दान्नान्यैः कर्मोपासनाधिकारिभिरिति भावः। मुहुर्मुहुर्नैरंतर्यदीर्घकालाभ्यासप्रयत्नेन स्नानभिक्षादावप्यनादरं कृत्वेत्यर्थः। वीक्षणीया=गुरुमुखादवगत्य विचारणीया । अनेन मुमुक्षुरधिकारी दर्शितः। एतेनैवार्थात् पूर्वकांडोत्तरकांडयोः साध्यसाधनभावः संबंधश्च दर्शितो भवतीति बोद्धव्यम् ॥ २ ॥

इस असार संसारसे मुक्तिके कारण "अपरोक्षानुभूति"ग्रन्थको कहूँ हूं। इस ग्रन्थको सज्जन पुरुष वारंवार प्रयत्न कर देखेंगे ॥ २ ॥

स्ववर्णाश्रमधर्म्मेण तपसा हरितोषणात् ।
साधनं च भवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥

ननु कार्यस्य कारणाधीनत्वात् पूर्वोक्तसाधनचतुष्टयस्य किं कारणमित्याशंक्याह—स्ववर्णेति। अत्र स्वशब्देन मुख्यगौणमिथ्याभेदेन त्रिविधेषु साक्षिपुत्रादिदेहादिलक्षणेष्वात्मसु मध्ये मिथ्यात्मायोग्यत्वाद्गृह्यते । तस्य देहादेर्ब्राह्मणादिवर्णब्रह्मचर्याद्याश्रमप्रयुक्तेन धर्मेण ब्रह्मार्पणकृतकर्मानुष्ठानजन्येनापूर्वेण पूर्वमीमांसाप्रसिद्धेन भाविफलाधारभूतेन पुण्यादिशब्द-

वाच्येनेत्यर्थः । तथा तपसा कृच्छ्रचान्द्रायणादिना प्रायश्चित्तेनेत्यर्थः । पुनः हरितोषणाद्भगवत्प्रीतिकरात्सर्वभूतदयालक्षणात् कर्मविशेषात् । एतैस्त्रिभिः साधनैः वैराग्यादिचतुष्टयरूपं साधनं मोक्षसाधको धर्मविशेषः पुंसां प्रभवेत् । संभावनायां लिङ् । यद्वैवमन्वयः-स्ववर्णाश्रमधर्मरूपेण तपसा कृत्वा यद्धरितोषणं तस्मादिति । यद्यपि साधनचतुष्टयविवेकादिक्रमेण हेतुहेतुमद्भावस्तथापि वैराग्यस्यासाधारणकारणतां द्योतयितुमादौ ग्रहणं कृतमिति बोद्धव्यम् ॥ ३ ॥

अपने अपने वर्णका धर्म धारण करनेसे अर्थात् ब्राह्मणोंको पढना-पढाना, यज्ञ करना-यज्ञ कराना, दान लेना-दान देना इन ६ छः कर्मोंकरके; क्षत्रियको प्रजापालन करनेसे; वैश्यको खेतीका कर्म्म करनेसे; शूद्रको ब्राह्मण क्षत्रिय वैश्यकी सेवा करनेसे और आश्रमधर्म्म धारण करनेसे अर्थात् ब्रह्मचर्य्य अवस्थामें गुरुसेवन करनेसे, गृहस्थ अवस्थामें पुत्र उत्पन्न करनेसे, वानप्रस्थ अवस्थामें स्त्रीसहित अथवा इकला जाकर ब्रह्मचर्य्य धारण कर अग्निहोत्रादि सर्व कर्म्म तथा ईश्वरकी आराधना करनेसे, सन्यस्त अवस्थामें सर्व कर्म्म त्याग करनेसे और चान्द्रायणादि व्रत करनेसे, हरिकीर्त्तन कर ईश्वरको प्रसन्न करनेसे मनुष्यको वैराग्य, नित्य अनित्य वस्तुका विवेक, शम दम आदि सम्पत्ति और मुमुक्षुत्व, यह चार साधन प्राप्त होय हैं ॥ ३ ॥

वैराग्यका स्वरूप ।

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्म्मलम् ॥४॥

कीदृशं तद्वैराग्यादिचतुष्टयमित्याकांक्षायां तत्स्वयमेव व्याचष्टे-"ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुता" इत्यंतेन

श्लोकषट्कात्मकेन ग्रंथेन। तत्रादौ वैराग्यस्य लक्षणमाह-ब्रह्मादिस्थावरांतेष्विति। ब्रह्मादिस्थावरांतेषु सत्यलोकादिमर्त्यलोकांतेषु भोगसाधनेषु अनु-कर्मजन्यत्वेनानित्यत्वं लक्षीकृत्येत्यर्थः। वैराग्यम्-इच्छाराहित्यम्। तत्र दृष्टांतमाह-यथैवेति। यथैव काकविष्ठायां वैराग्यम् । गर्दभादिविष्ठायामपि कदाचित् कस्यचित् ज्वरशांत्यर्थं ग्रहणेच्छा भवति अतः काकविष्ठाया ग्रहणम् । उपलक्षणमेतत् वांत्यादीनाम् । विषयेष्विच्छानुदये वैराग्यस्य हेतुगर्भितं विशेषणमाह-तदिति । हि यस्मात्तद्वैराग्यं निर्मलं रागादिमलरहितम् ॥ ४ ॥

जिस प्रकार संसारी पुरुष काककी विष्ठामें घृणा करै है तिसी प्रकार ब्रह्माको आदि ले स्थावर पर्य्यन्त विषयोंमें जो वैराग्य करना है सो निर्मल वैराग्य होय है ॥ ४ ॥

वस्तु-विवेकका स्वरूप ।

नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम् ।
एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५ ॥

इदानीं वैराग्यकारणं विवेकं लक्षयति-नित्यमित्यादि । वै प्रसिद्धं सः वस्तुनः पदार्थस्य विवेको विवेचनविशेषो ज्ञेयः । सः क इत्यत आह-एवमिति। य एवंप्रकारेण सम्यक् संशयादिशून्यो निश्चयः । एवं कथमित्यत आह-नित्यमिति । हीति विद्वदनुभवप्रसिद्धमात्मस्वरूपं नित्यमविनाशि अबाध्यं सत्यमित्यर्थः। "अविनाशीवाअरेऽयमात्मा" इतिश्रुतेः। दृश्यमनात्मस्वरूपं तद्विपरीतगं तदात्मस्वरूपं तस्माद्विपरीतत्वेन गच्छति प्राप्नोति

व्यवहारभूमिमिति तथाविधं विनाशि बाध्यमित्यर्थः । अत्रेदम-नुमानमपि सूचितं भवति-'आत्मस्वरूपं नित्यं द्रष्टृत्वात्, यन्न नित्यं तन्न द्रष्टृ, यथा घटादीति; केवलव्यतिरेकी हेतुः । तथाऽनात्मस्वरूपमनित्यं दृश्यत्वात्, यन्नानित्यं तन्न दृश्यं, यथाऽऽत्मस्वरूपमित्ययमपि केवलव्यतिरेकी हेतुः' ॥ ५ ॥

आत्मा नित्य है और जो कुछ संसारकी वस्तु देखनेमें आवै है सो अनित्य है इस प्रकारका अच्छी तरह जो पुरुषको निश्चय होना है सो वस्तुका विवेक कहावै है ॥ ५ ॥

शमदमका स्वरूप ।

सदैव वासनात्यागः शमोऽयमिति शब्दितः ।
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥

तदेवं वैराग्यकारणं विवेकं व्याख्याय वैराग्यकार्यं शमादिषट्कं लक्षयति-सदैवेत्यादित्रिभिः श्लोकैः । सदैव सर्वस्मिन्नपि काले वासनात्यागः पूर्वसंस्कारापेक्षयाऽयं शम इति शब्दितः । अंतःकरणनिग्रहः शमशब्दार्थः । बाह्यवृत्तीनां श्रोत्रवागादीनां निग्रहो निषिद्धप्रवृत्तितिरस्कारो दम इति शब्देनाभिधीयते कथ्यते ॥ ६ ॥

संसारकी वासनाओंका त्याग करना 'शम' कहावै है और बाह्य वृत्तियोंको रोक लेना अर्थात् नासिकादि इन्द्रियोंको गन्धादि विषयोंसे हटाकर वशमें कर लेना 'दम' कहावै है ॥ ६ ॥

उपरति और तितिक्षाका स्वरूप ।

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥

विषयेभ्य इति । हीति प्रसिद्धेभ्यो बंधकेभ्यः शब्दादिभ्यो या परावृत्तिर्निवृत्तिरनित्यत्वादिदोषदर्शनेन ग्रहणानिच्छा सा उपरतिरुच्यते । कीदृशी सेत्यत आह—परमेति । परमुत्कृष्टमात्मज्ञानं यस्याः सकाशाज्जायते सा परमा, आत्मज्ञानसाधनभूतेत्यर्थः । अनया सर्वकर्मसंन्यासो लक्ष्यते । किंच सहनमिति सर्वदुःखानां सर्वदुःखसाधनानां शीतोष्णादिद्वंद्वानां यत्सहनं प्रतीकारानिच्छा सा शुभा सुखरूपा तितिक्षा मता विदुषामित्यर्थः ॥ ७ ॥

विषयोंसे अत्यन्त चित्तको हटा लेनेका नाम 'उपरति' है । और संपूर्ण प्रकारके दुःखोंको सह लेना सो 'तितिक्षा' कहावै है ॥ ७ ॥

श्रद्धा और समाधानका स्वरूप ।

निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता ।
चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम् ॥८॥

निगमेति । निगमाचार्यवाक्येषु—वेदगुरुवचनेषु, यद्वोपनिषद्व्याख्यातृुपदेशेषु भक्तिर्भजनं विश्वास इत्यर्थः । सा श्रद्धेति विश्रुता वेदांतप्रसिद्धा । तु पुनः सल्लक्ष्ये "सदेव सोम्येदमग्र आसीत्" इत्यादिश्रुतिलक्ष्ये प्रत्यगभिन्ने ब्रह्मणि चित्तैकाग्र्यं तदेकजिज्ञासेत्यर्थः, तत्समाधानमिति स्मृतम् ॥ ८ ॥

वेद, शास्त्र, पुराण और गुरुके वाक्योंमें जो भक्ति करना है सो 'श्रद्धा' कहावे है और शब्दादि विषयोंसे अन्तःकरणको हटाकर मोक्षोपकारक श्रवण, मनन, निदिध्यासन द्वारा निरन्तर नित्य अनित्यके विचारको 'समाधान' कहै हैं ॥ ८ ॥

मुमुक्षुताका स्वरूप ।

संसारबन्धनिर्मुक्तिः कथं मे स्यात्कदा विधे ।
इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥

एवं शमादिषट्कमभिधायैतत्कार्यभूतां मुमुक्षुतामाह—संसारबंधेति । इति या सुदृढा बुद्धिः सा मुमुक्षुता वक्तव्येत्यन्वयः । सा केत्यत आह—संसारेति । भो विधे मद्दैव,यद्वा सर्वकर्तर्विधातर्ब्रह्मन् ! मे मम संसारबंधनिर्मुक्तिर्नानायोनिसंबंधनिवृत्तिः कदा कस्मिन्काले कथं केन प्रकारेण भवेदित्येवंरूपा बुद्धिर्मुमुक्षुतेत्यर्थः ॥ ९ ॥

किस प्रकार इस संसारबन्धनसे मेरी मुक्ति होगी ऐसी जो अत्यन्त दृढ बुद्धि है सो 'मुमुक्षुता' कहावै है ॥ ९ ॥

उक्तसाधनयुक्तेन विचारः पुरुषेण हि ।
कर्त्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥

इदं साधनचतुष्टयं यदर्थमुपन्यस्तं तदिदानीं दर्शयति-उक्तेति । उक्तानि--ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुतेत्यंतग्रंथसंदर्भेण वर्णितानि यानि वैराग्यादिसाधनानि । ज्ञानोपकरणानि तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन हीति विद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्षणः । यद्वा हीत्यव्ययमेवार्थेऽन्यनिषेधार्थ इत्यर्थः । विचारो विवेकः कर्तव्य आवर्तयितव्यः । किमर्थमित्यत आह—ज्ञानसिद्ध्यर्थमिति । आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबोधोद्भवनाय । नन्वात्मज्ञानसिद्ध्या कः पुरुषार्थ इत्याशंक्य मोक्षाख्यं चतुर्थपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि—शुभमिति । शुभं परमानन्दरूपत्वेन मंगलं मोक्ष-

सुखमित्यर्थः । इच्छता प्रार्थयता । आत्मनः शुभमिति वान्वयः ॥ १० ॥

ऊपर कहे हुए वैराग्य आदि साधनों करके युक्त अपना शुभ चाहनेवाले पुरुषको ज्ञानकी सिद्धिके निमित्त विचार करना योग्य है। (ऊपर कहे हुए साधनोंकरके युक्त) इस कारण कहा कि 'शान्तो दान्तः' ऐसी वेदकी श्रुति है। अर्थात् शम, दम युक्त पुरुष वेदान्तका अधिकारी होय है। जैसे और जगहभी कहा है—"प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे ॥ गुणान्वितायानुगताय सर्वदा प्रदेयमेतत् सकलं मुमुक्षवे ॥१॥" अर्थात् शान्तचित्त, जितेन्द्रिय, दोषरहित, शास्त्रोक्त कार्य्य करनेवाले, शास्त्रोक्त गुणोंकरके युक्त, शुभ आचरण करनेवाले तथा मोक्षकी इच्छा करनेवाले पुरुषको यह शास्त्र देना चाहिये ॥ १० ॥

ज्ञानकी आवश्यकता ।

नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः ।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥११॥

ननु ज्ञानसिद्धयर्थं विचार एव कर्तव्य इति नियमः कुतः क्रियत इत्याशंक्य सदृष्टांतमाह--नोत्पद्यत इति। विचारेण विना अन्यसाधनैः कर्मोपासनालक्षणैः ज्ञानं नोत्पद्यते । तत्र दृष्टांतमाह--यथेति । यथा क्वचित्कस्मिंश्चिद्देशे सूर्यादिप्रकाशेन विना पदार्थभानं घटादिवस्तुप्रकाशो न भवति । हीति सर्वजनप्रसिद्धम् । अतो नियमः क्रियत इति भावः ॥ ११ ॥

विना ज्ञानके और साधनों करके नित्य अनित्य वस्तुका विचार नहीं होय है, जैसे सूर्य्य, दीपक इत्यादिकोंके प्रकाशके विना कहीं भी कोई घटपटादिपदार्थोंका भान नहीं होय है ॥ ११ ॥

विचारका स्वरूप ।

कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥

तर्हि स विचारः कीदृश इत्यत आह-कोऽहमिति । अहं कर्ता सुखीत्यादिव्यवह्रियमाणः कः किंस्वरूपः तथा इदं जगत् स्थावरजंगमात्मकं कथं कस्माज्जातम् । किमधिष्ठानमित्यर्थः । तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य जगतः कर्त्तोत्पादकः को विद्यते । वै इति विकल्पं द्योतयति । किं जीवदृष्टं कर्तृ किंवेश्वरः किं वान्यदेव । किञ्चिदिति विकल्पः । किंचेह जगति उपादानं घटस्य मृद्वत् किमस्ति? अयमात्मा जगत्कारणविषयः ईदृश एवंस्वरूपो विचारः । स एव ज्ञानसाधनमित्यर्थः ॥१२॥

मैं कौन हूँ? यह संसार किस प्रकार उत्पन्न हुआ? कौन इस जगत्‌का कर्त्ता है? और संसारका उपादान कारण कौन है? इस प्रकार नानाप्रकारका जो विचार करना है सो 'विचार' कहावै है ॥ १२ ॥

नाहं भूतगणो देहो नाहं चाक्षगणस्तथा ।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः ॥ १३ ॥

ननु "चैतन्यविशिष्टः कायः पुरुषः" इति बार्हस्पत्यसूत्राद्देहाकारेण परिणतानि पृथिव्यादिचत्वारि भूतान्येवात्मेति चार्वाका वदंति । स एव कर्ता सुखीत्यादिसर्वव्यवहारमूलमिति सर्वजनप्रसिद्धौ सत्यामात्मविषयो विचारो न स्यादित्यत आह-नाहमिति । अहमहंशब्दप्रत्यालंबनः प्रत्यगात्मा भूतगणो यो देहः स न भवामि, तस्य घटादिवद्दृश्यत्वादित्यर्थः । "नहींन्द्रिय-

गणस्त्वं स्या" इति चार्वाकैकदेशि मतमुत्थाप्य दूषयति—नाहं चेति । च पुनरक्षगणः=श्रोत्रादीन्द्रियसंघातोऽप्यहं न भवामि । तथेतिपदेन देहवदिन्द्रियगणस्यापि भूतविकारत्वं दर्शितम् । "स वा एष पुरुषोऽन्नरसमयः अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्" इत्यादिश्रुतिरुभयत्र प्रमाणम्।ननु यदि देहद्वयं त्वं नासि तर्हि शून्यमेव स्यादित्याशंक्याह—एतदिति। एतद्विलक्षणः=एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्मकोऽस्मि। 'अस्थूलमनण्वह्रस्वम्' इत्यादिश्रुतेः । कश्चिदिति जात्यादिरहितत्वान्मनोवाचामगोचरत्वं दर्शितम् । अयमीदृशः स विचार इति व्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेऽपि बोद्धव्यः ॥१३॥

मैं भूतगण समष्टिरूप देह नहीं हूँ, मैं समष्टि रूप इन्द्रियोंका समूह नहीं हूँ इससे विलक्षण कोई है सो विचार कहावै है ॥ १३ ॥

अज्ञानात्प्रभवं सर्वं ज्ञानेन प्रविलीयते ।
सङ्कल्पो विविधः कर्त्ता विचारः सोऽयमीदृशः ॥१४॥

तदेवं कोऽहमित्येतन्निश्चित्येदानीं कथमिदं जातमित्यस्य निश्चयः क्रियते। तत्र "पृथिव्यादिभूतानि कार्यत्वात्स्वस्वपरमाणुभ्यो जायंते"इति तार्किकादयो मन्यंते । "कर्मणो जायंते" इति मीमांसकाः।'प्रधानादेव' इति सांख्याः।तदेतन्निराकुर्वन्नाह अज्ञानेति।सर्वं जगदिदं नामरूपात्मकमज्ञानप्रभवमज्ञानात्पूर्वोक्तस्वस्वरूपास्फुरणात्प्रभवति।तथाविधम्,अतएवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इव प्रकाशेन प्रविलीयते, निश्शेषलीनं

भवतीत्यर्थः।को वै कर्तैत्यस्य निर्णयमाह—संकल्प इति। विविधो नानाप्रकारः संकल्पः इदं करिष्यामीत्यादिलक्षणोंतःकरणपरिणामः। कारणानुकूलव्यापारवान् कर्त्ता । शेषं पूर्वोक्तम् ॥१४॥

समस्त जगत् अज्ञानसे उत्पन्न होय है (अज्ञान ये है इस सब संसारकी कल्पना होय है) ज्ञान होय है तब नष्टप्राय मालूम होय है (अर्थात् ज्ञानका प्रकाश होनेसे स्वरूप जानाजाय है इसी कारण ज्ञानावस्थामें इस पुरुषको सङ्कल्प विकल्प नहीं होय हैं) नानाप्रकारका जो संकल्प है सो इस संसारका कर्त्ता है इस प्रकार जो चिन्तना है सो विचार है ॥ १४ ॥

एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम् ।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः ॥ १५ ॥

अथोपादानं किमस्तीत्यस्य निर्णयमाह—एतयोरिति । एतयोरज्ञानसंकल्पयोर्यदुपादानं उत्पत्तिस्थितिनाशाय कारणं तत्तु सत्कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः। अत एवाधिष्ठानज्ञाननिर्वृत्त्याऽज्ञानकार्यत्वेन मिथ्याभूतमपि जगत् यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदिति भावः । ब्रह्मणः सत्त्वे हेतुः—अव्ययमिति । अव्ययमपक्षयरहितम् । अनेनैतत्पूर्वभूता अपि जन्मादिविकारा निरस्ताः, नाशश्च निरस्तः। षड्भावविकारराहित्ये हेतुः एकं सजातीयादिभेदशून्यम् । तर्हि कुतो न दृश्यते तत्राह—सूक्ष्ममिति । सूक्ष्मं मनोवागादींद्रियागोचरम् । तेषां प्रवृत्तिनिमित्तजातिक्रियादिशून्यत्वादित्यर्थः । ब्रह्मण उपादानत्वे दृष्टांतमाह—यथैवेति । यथैव मृद्घटादीनामुपादानं तथैवेत्यर्थः । एवंप्रकारेण कार्यकारणभेदो नाममात्रमिति सूचितम् ॥ १५ ॥

जैसे मृत्तिका घटका उपादान कारण है और सुवर्ण कुण्डलादिका कारण है इसी प्रकार जो एक, सूक्ष्म, सत्यस्वरूप और अविनाशी ब्रह्म है, जो अज्ञान, संकल्प इनका उपादान कारण है सोई इस जगत्का उपादान कारण है इसका जो निरूपण है सो विचार कहावे है ॥ १५ ॥

अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदव्ययः ।
तदहं नात्र सन्देहो विचारः सोऽयमीदृशः ॥ १६ ॥

ननु यद्यपि कार्यकारणभेदो वाचारम्भणमात्रस्तथापि जीवब्रह्मणोर्भेदो वास्तवः स्यादित्याशंक्याह—अहमिति । अत्र यत इत्यध्याहारः । तथाचायमर्थः—यतोऽहमहंप्रत्ययवेद्योऽप्येकः सजातीयादिभेदशून्यः। मनुष्यमात्रेऽप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः। च पुनः सूक्ष्म इंद्रियागोचरः । पुनर्ज्ञाताऽहंकारादिप्रकाशकत्वेन चेतन इत्यर्थः । तथा साक्षी—साक्षादिंद्रियार्थसन्निकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी, निर्विकार इत्यर्थः । अत एव सदव्ययः संश्चासावव्ययश्च, विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः । यस्मादेवंभूतोऽहं तत्तस्मादहमहंप्रत्ययवेद्यस्तत्सत्यज्ञानादिलक्षणं ब्रह्म अत्र सन्देहो नास्तीत्यर्थः । सोऽयमीदृशो विचार इति ॥ १६ ॥

अहम् शब्द करके प्रतिपाद्य अर्थात् आत्मा अद्वितीय, अतिसूक्ष्म, जाननेवाला, सर्वसाक्षी, नित्य और अविनाशी ब्रह्म है इसमें कोई सन्देह नहीं है। इस प्रकार जो तत्त्व निर्णय है सो विचार कहावे है ॥१६॥

अज्ञानका स्वरूप ।

आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १७ ॥

एतदेव जीवब्रह्मैक्यज्ञानप्रदर्शनेन द्रढयति—आत्मेत्यापञ्चभिः । यतोऽप्रत्ययवेद्य आत्मा—अतति संततभावेन जाग्रदादिसर्वावस्थास्वनुवर्तत इत्यात्मा, अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्वरूप इत्यर्थः । स त्वंपदलक्ष्यार्थोऽपि तत्पदलक्ष्यार्थ एव । विनिष्कलो विशेषेण निर्गतकलो निरवयव इत्यर्थः । अन्यथा सावयवत्वे घटादिवद्विनाशित्वापत्तिरिति भावः । अत्र हेतुः—एकः । हीति " एकमेवाद्वितीयम् " इत्यादिश्रुतिप्रसिद्धिं द्योतयति । ननु तथा लिंगदेहोऽप्यस्तीति चेन्नेत्याह—देह इति । देहो लिङ्गदेहः । सूक्ष्मशरीरमिति यावत् । स बहुभिः कलाभिः श्रोत्रादिबुद्ध्यंताभिः सप्तदशभिरावृतः आच्छादितस्तत्संघात इत्यर्थः । अतएव लिंगदेहस्य निरवयवत्वाद्यभावात् ज्ञानेन तत्कारणाज्ञाननिवृत्तौ निवृत्तिरन्यथाऽनिर्मोक्षप्रसंग इति भावः । एवमतिवैलक्षण्ये सत्यपि तयोरात्मदेहयोः प्रकाशतमसोरिवैक्यमैकात्म्यं प्रपश्यंति तार्किकादय इत्यर्थः । अतो विपरीतदर्शनात्परमन्यदज्ञानं किमस्ति एतदेवाज्ञानमित्यर्थः । विपर्ययरूपकर्मान्यथानुपपत्त्या तत्कारणं मूलाऽज्ञानं कल्प्यत इति भावः ॥ १७ ॥

आत्मा विनिष्कल अर्थात् अवयवहीन है इसी कारण एक है और देह बहुत अवयवोंसे बना है तब भी संसार बन्धनमें फँसे हुए पुरुष आत्मा और देहकी ऐक्यता कर व्यवहार करते हैं इससे अधिक और क्या अज्ञान होगा ? ॥ १७ ॥

आत्मा नियामकश्चान्तर्देहो बाह्यो नियम्यकः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १८ ॥

पुनर्वैलक्षण्यमाह—आत्मेति । आत्मा नियामको नियंता । च पुनरंतः पञ्चकोषांतरः, देहस्तु नियम्यः सन् बाह्यः । तयोरैक्यमित्युत्तरार्द्धं व्याख्यातम् एवमग्रेऽपि ज्ञेयम् ॥ १८ ॥

आत्मा अन्दर स्थित है और प्रेरणा करनेवाला है, देह बाहर और प्रेरित है तब भी संसार बन्धनमें फँसे हुए अज्ञानी पुरुष देह और आत्माकी समता कर व्यवहार करते हैं इससे अधिक और क्या अज्ञान होगा ? ॥ १८ ॥

आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽशुचिः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ १९ ॥

अन्यदपि वैलक्षण्यमाह—आत्मेति । आत्मा ज्ञानमयः प्रकाशरूपोऽत एव पुण्यः शुद्धः, देहस्तु मांसादिविकारवानत एवाऽशुचिः। एतेनात्मनः स्थूलदेहादपि वैलक्षण्यमुक्तं भवति । तयोरैक्यमित्यादि पूर्ववत् ॥ १९ ॥

आत्मा ज्ञानमय है, पवित्र है और देह मांस रुधिर अस्थि चर्बी इत्यादिकोंसे बना हुआ है इसी कारण अपवित्र है । तब भी संसारबंधनमें फँसे हुए अज्ञानी पुरुष देह और आत्माकी समता कर व्यवहार करे हैं इससे अधिक और क्या अज्ञान होगा ? ॥ १९ ॥

आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २० ॥

वैलक्षण्यांतरमाह—आत्मेति । आत्मा स्वयंप्रकाशः सन् सूर्यादिवदन्यसर्वप्रकाशकोऽत एव स्वच्छः, प्राकाश्यगुणदोषसंबंधशून्य इत्यर्थः । "असंगो ह्ययं पुरुषः" इति श्रुतेः । देहस्तु तामसो घटादिवत्प्रकाश्यत्वेन जडः । तयोरैक्यमित्यादि पूर्ववत् ॥ २० ॥

आत्मा सबका प्रकाशक ज्योतिःस्वरूप है और स्वच्छ है (अर्थात् जिसमें रजोगुण सतोगुण तमोगुणरूप सृष्टि मरु मरीचिकाकी तरह मालूम होय वास्तवमें आत्मा निर्मल है) और देह सदा तमोगुण करके युक्त रहे है तब भी संसारी पुरुष देह आत्माकी समता कर व्यवहार करै हैं इससे अधिक और क्या अज्ञान होगा ? ॥ २० ॥

आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम् ॥ २१ ॥

अत्र सर्वत्र पौनरुक्त्यं नाशंकनीयम् । आत्मनोऽलौकिकत्वेनात्यंतदुर्बोधत्वादेव बहुधा वैलक्षण्यं प्रदर्श्यते परमकारुणिकैः श्रीमदाचार्यैः-आत्मेति । आत्मा नित्यो ध्वंसाप्रतियोगी । तत्र हेतुः—हि यस्मात्सद्रूपः अबाध्यस्वरूपः, देहस्तु ध्वंसप्रतियोगी । अत्रापि हेतुः—हि यस्मादसन्मयोऽनित्यः विकारित्वेन बाधयोग्य इत्यर्थः । यस्मादेवमात्मदेहयोरत्यंतवैलक्षण्यं तस्मात्तयोरैक्यदर्शनं केवलमज्ञानमिति ॥ २१ ॥

आत्मा नित्य है अर्थात् आदि मध्य अन्त करके रहित है, इसी कारण सद्रूप है अर्थात् सदा एकरस रहे है और देह अनित्य है अर्थात् उत्पन्न होय है । बालक होय है, युवा होय है, वृद्ध होय है, रोगी होय है, सुखदुःख करके ग्रसित रहै है और असत् है अर्थात् नाशवान् है तौ भी संसारी पुरुष देह और आत्माकी समता कर व्यवहार करे हैं इससे अधिक और क्या अज्ञान होगा ? ॥ २१ ॥

आत्माका प्रकाशत्व ।

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।
नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥

नन्वात्मनः प्रकाशत्वं किं नामेत्यत आह—आत्मन इति । आत्मनस्तत् प्रकाशत्वं बोद्धव्यम् । किं तदित्यत आह—यदिति । यत्पदार्थावभासनं घटपटादिवस्तुविषयप्रकाशः,इदंतया निर्दिश्यमानाविषयदर्शनमिति यावत् । तर्ह्यग्न्यादिप्रकाशवद्विकारित्वं स्यादित्यत आह—**नाग्न्यादिदीप्तिवद्दीप्तिरिति** । इयमात्मदीप्तिरग्न्यादिदीप्तिवन्न, कदाचिदुत्पत्तिविनाशादिविकारवती नेत्यर्थः । तत्र हेतुमाह—**भवतीति** । भवत्यांध्यं यतो निशि—यतः कारणान्निशि रात्रावग्न्यादिप्रकाश एकस्मिन्देशे सत्यपि तदन्यत्र लोकस्यांध्यं रूपग्रहाक्षमत्वं भवति नैतादृश्यात्मदीप्तिरेकत्र विद्यमाना चैकत्राऽविद्यमाना परिच्छिन्ना चास्ति; किंतु दीपादिरूपस्याग्न्यादिप्रकाशस्य प्रकाशिका, तदभावे चांधकारस्य प्रकाशिका उत्पत्तिनाशरहिता च सदा सर्वत्र पूर्णैवास्ति । यद्वा इयमात्मदीप्तिरग्न्यादिदीप्तिसदृशी न, कुतः ? यतः कारणान्निशि रात्रावांध्यमंधकारो भवत्येतद्विलक्षणाऽऽत्मदीप्तिर्ज्ञेया । यद्यात्मदीप्तिरग्न्यादिदीप्तिसदृशी भवेत्तर्ह्यग्न्यादिदीप्त्या यथांधकारस्य नाशो भवति तथात्मदीप्त्याऽप्यंधकारस्य नाशः स्यात् । परंत्वात्मनः सत्ताप्रकाशाभ्यां सर्वत्र सर्वदा विद्यमानत्वेऽप्यन्धकारस्य नाशो न भवत्यत आत्मदीप्तिरग्न्यादिदीप्तिसदृशी न, किंतु इयमग्न्यादिदीप्तिर्भातीदमांध्यं भातीत्याद्याकारेण अग्न्यादिदीप्तेरांध्यस्य चान्यस्य सर्वस्य च प्रकाशिका चाविरोधिन्यात्मदीप्तिः स्वप्रकाशैवाभ्युपेतव्या सर्वैरात्मज्ञानारूढैरित्यर्थः । तस्मादग्न्यादिदीप्तीनामपि दीपिकाऽन्यसाधननिरपेक्षा या दीप्तिः स आत्मप्रकाश इति भावः ॥ २२ ॥

जिस प्रकार घटपटादि पदार्थ प्रकाश होय हैं तिसी प्रकार आत्माका प्रकाश होय है। सूर्य्य चन्द्र अग्निके प्रकाशकी तरह आत्माका प्रकाश विकारको नहीं प्राप्त होय है, क्योंकि जब रात्रिमें सूर्य्यादिकका प्रकाश नहीं होय है तब अन्धकार होय है। इससे जाना जाय है कि अग्नि आदिका प्रकाश विकारको प्राप्त होय है, किन्तु आत्माका प्रकाशक भी विकारको नहीं प्राप्त होय है अर्थात् आत्माका प्रकाश सदा सब जगह रहै है ॥ २२ ॥

मूढका लक्षण ।

देहोऽहमित्ययं मूढो धृत्वा तिष्ठत्यहो जनः ।
ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥

तदेवं प्रकाश्यप्रकाशकत्वादिलक्षणवैलक्षण्ये सत्यपि आत्मानात्मभेददर्शितमुपसंहरन्नुभयोर्भेदं स्पष्टयति-देह इति । अहमहंशब्दप्रत्ययालंबनः प्रत्यगात्माऽयमिदंतया निर्दिश्यमानो घटादिवत्प्रत्यक्षतया दृश्यमानो देहोऽस्मीति उभयोर्द्रष्टृदृश्ययोरैक्यं कृत्वा मूढः-स्वाज्ञानकार्यविपर्ययमोहव्याप्तो जनस्तिष्ठति, कृतकृत्यबुद्ध्या निर्व्यापारो भवतीत्यर्थः । एतदहो ! महदज्ञानमिति भावः । किं कृत्वापीत्यत आह-ममेति । मम मत्संबन्धी अयं देह इति सामान्यतो भेदं ज्ञात्वापि। अत एवाश्चर्यमिति तात्पर्यम् । क इव सर्वदा घटद्रष्टेव । यथा सर्वकाले घटद्रष्टा पुरुषो 'ममायं घट' इति जानाति नतु 'अहं घट' इति कदाचिदपि जानातीत्यर्थः ॥ २३ ॥

मनुष्यके पास एक घडा होय है तब 'मेरा घडा है' ऐसा व्यवहार करै है, 'मैं घट हूँ' ऐसा व्यवहार नहीं करै, किन्तु 'यह देह मेरा है, मैं हूं' ऐसा संसारी पुरुष ज्ञान करै है परन्तु वास्तवमें यह समझना अज्ञान है ॥ २३ ॥

ज्ञानका स्वरूप ।

ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥

ननु एतस्मिंस्तद्बुद्धिरिति लक्षणभ्रमापरपर्यायमोहकार्यलिंगानुमेयमज्ञानमीदृक् तर्हि तन्निवर्तकं किमित्याकांक्षायां तद्विरोधित्वादात्मज्ञानमेवात्माऽज्ञाननिवर्तकमित्यभिप्रेत्य तल्लक्षणमाह—ब्रह्मेत्यादिपञ्चभिः । अहम् अहंशब्दप्रत्ययालंबनः प्रत्यगात्मा ब्रह्मैवास्मि । एतयोस्तत्त्वंपदार्थयोरैक्ये हेतुगर्भितानि विशेषणान्याह—सम इति । समः सत्ताप्रकाशाभ्यां सर्वाभिन्नः । पुनः किंलक्षणः । शांतः-निरस्तसमस्तोपाधित्वाद्विक्षेपादिविकारशून्यः । पुनः किंलक्षणः । सच्चिदानन्दलक्षणः सच्चिदानंदैरनृतजडदुःखप्रतियोगिभिर्लक्ष्यते विरुद्धांशत्यागरूपया भागलक्षणया ज्ञायत इति सच्चिदानंदलक्षणः । ब्रह्मबोधे हि द्विविधं द्वारम्—विधिर्निषेधश्चेति । तत्र सत्यज्ञानादिसाक्षाद्वाचकशब्दप्रयोगलक्षणो विधिरुक्तः । इदानीमतन्निरसनलक्षणो निषेधः प्रदर्श्यते—नाहमिति । अहमहंशब्दप्रत्ययालम्बन आत्मा देहो नेत्यन्वयः । देह इत्युपलक्षणं प्राणेंद्रियादीनामपि । हीति विद्वज्जनप्रसिद्धम् । देहादेरनात्मत्वे हेतुमाह—असदिति । असद्रूपोऽसद्बाध्यमनृतं तादृग्रूपं स्वरूपं यस्य स तथाविधः । इत्येवंप्रकारम् “अहं ब्रह्मास्मि” इत्यादिमहावाक्यजन्याऽखण्डाकारबुद्धिरूपं ज्ञानं बुधैरात्मतत्त्वज्ञैरुच्यते, कथ्यत इत्यर्थः । एतद्विलक्षणः सर्वो ज्ञानाभास इति भावः ॥ २४ ॥

मैं सम अर्थात् सर्वत्र प्रकाशद्वारा हूँ, शान्त हूँ अर्थात् निर्विकार हूँ, त्रिकालमें विद्यमान, चैतन्यस्वरूप और आनन्दमयस्वरूप ब्रह्म हूँ। 'नाशवान् देह मैं नहीं हूँ' इस प्रकार ज्ञानको पण्डित जन तत्त्वज्ञान कहै हैं ॥ २४ ॥

निर्विकारो निराकारो निरवद्योऽहमव्ययः।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥

नन्वहं जातो मृतः सुखी दुःखीत्याद्यनेकविकारत्वेनाहंशब्दप्रत्ययालंबनस्य प्रतीयमानत्वात् कथं तस्य ब्रह्मत्वमित्यत आह—**निर्विकार** इति। अहमहंशब्दप्रत्ययालंबनः प्रत्यगात्मा निर्विकारोऽस्मीति शेषः। निर्गता विकारा जन्मादयो यस्मात् स तथाविधः। तेषां देहधर्मत्वादिति भावः। तत्र हेतुः—निराकारः देहाद्याकाररहितः। अत एव निरवद्यो वातपित्तादिजन्याध्यात्मिकादितापत्रयरहित इत्यर्थः। अत एवाऽव्ययः अपक्षयादिरहित इत्यर्थः। अहं मनुष्य इत्यादिप्रतीतेः कथं निर्विकारत्वमिति चेत्सा प्रतीतिः शुक्तिरजतादिवद्बाध्यत्वाद्भ्रांतिरित्याह—**नाहमिति**। नाहमित्युत्तरार्द्धं व्याख्यातं पूर्वश्लोके। एवमुत्तरत्रापि ज्ञेयम्। पुनरुक्तिस्तु ज्ञानप्रतिबंधकस्य बुद्धिमांद्यविपर्ययादेर्दार्ढ्यान्नाशंकनीया ॥ २५ ॥

मैं निर्विकार हूं अर्थात् सदा एकरूप हूँ। निराकार अर्थात् मेरा कोई आकार नहीं है। मैं निरवद्य हूं अर्थात् आध्यात्मिक, आधिदैविक और आधिभौतिक इन तीन तापों करके रहित हूँ और अविनाशी हूं, नाशवान् देह नहीं हूं। इस प्रकार ज्ञानको पण्डितगण तत्त्वज्ञान कहै हैं ॥ २५ ॥

निरामयो निराभासो निर्विकल्पोऽहमाततः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २६ ॥

पुनः किंलक्षणं ज्ञानमित्यत आह–निरामय इति । अहं निरामयः–सर्वरोगरहितः, निराभासो–वृत्तिव्याप्यत्वेऽपि फलव्याप्यत्वशून्यः, निर्विकल्पः–कल्पनाहीनः, आततः–व्यापकः ॥ २६ ॥

मैं रोगहीन हूं अर्थात् मुझे राजयक्ष्मादिरोग नहीं होय हैं, मुझे फलकी अभिलाषा नहीं होय है, मैं कल्पना नहीं करूं हूं और सर्वव्यापी हूं । मैं नाशवान् देह नहीं हूं, इस प्रकार ज्ञानको पण्डित जन तत्त्वज्ञान कहे हैं ॥ २६ ॥

निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥

पुनः किंलक्षणं ज्ञानमित्यत आह–निर्गुण इति । अहं निर्गुणो–गुणरहितः, गुणानां मायामयत्वादित्यर्थः । अत एव निष्क्रियः–क्रियारहितः तथा नित्यो–विनाशरहितः, अत एव नित्यमुक्तः–कालत्रयेऽपि बंधशून्यः । तत्र हेतुः–अच्युतः अप्रच्युतसच्चिदानंदस्वभावः ॥ २७ ॥

मैं रजोगुण, सतोगुण और तमोगुणरूप इन तीन गुणों करके रहित हूं, क्रियाकरके रहित नित्य हूं, नित्यमुक्त हूं अर्थात् सर्वदा ही बन्धशून्य हूं, अच्युत हूं, अर्थात् सदा ज्ञानमय हूं, मैं नाशवान् देह नहीं हूं इस प्रकार ज्ञानको पण्डित जन तत्त्वज्ञान कहे हैं ॥ २७ ॥

निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः ।
नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २८ ॥

पुनरपि ज्ञानलक्षणमाह—निर्मल इति । अहं निर्मलः अविद्यातत्कार्यलक्षणमलरहितः; अत एव निश्चलः व्यापकत्वादाकाशवन्निश्चल इत्यर्थः । निश्चलत्वे हेतुः—अनंतः—देशकालवस्तुपरिच्छेदशून्यः, शुद्धः—अशुद्धिरहितः, पुनरजरः जरारहितः, अमरो मरणरहितश्च । सर्वधर्माणां देहत्रयवर्तित्वादिति भावः ॥ २८ ॥

मैं निर्मल अर्थात् सर्वदोषों करके रहित हूं और निश्चल हूं अर्थात् चलायमान नहीं होऊं हूं, अनन्त हूं अर्थात् मेरा अन्त नहीं है और शुद्ध हूं और अजर हूं अर्थात् बूढा नहीं होऊं हूं और अमर हूं अर्थात् मेरी कभी मृत्यु नहीं होय है, नाशवान् देह नहीं हूं ऐसा जो ज्ञान है उसको पण्डितजन तत्त्वज्ञान कहे हैं ॥ २८ ॥

शून्यवादका निराकरण ।

स्वदेहे शोभनं संतं पुरुषाख्यं च संमतम् ।
किं मूर्ख शून्यमात्मानं देहातीतं करोषि भोः ॥ २९ ॥

नन्वात्मा प्रत्यक्षदेहरूपो न भवति तर्हि शून्यत्वमात्मनः स्यादित्याशंक्याह—स्वदेहे इति । भो मूर्ख ! स्वदेहे पुरुषाख्यं पुरि मनुष्यशरीरे उषति अहमाकारेण वसतीति पुरुष इत्याख्या नाम यस्य तम् । अतएव शोभनं मंगलं शरीरविलक्षणत्वादतिमंगलं तथा संमतम् । "अयमात्मा ब्रह्म" इत्यादिवाक्यनिर्णीतं चकारात् "उत्तमः पुरुषस्त्वन्यः" इत्यादिस्मृतिनिर्णीत घटद्रष्टृवद्देहद्रष्टृत्वेन देहातीतमात्मानं सततं भावं संतं—सर्वव्यवहाराधिष्ठानं, शून्यं खपुष्पादिवत् अत्यंताऽभावरूपं किं करोषि कथं मन्यसे । मामन्यथा इति भावः । क्वचित् "स्वदेहम्" इति द्वितीयांतः पाठस्तस्मिन् पक्षे देहात्मवाद्येव वदति । उक्तलक्षणं मनुष्यदेहं त्यक्त्वा, सम्मानमन्यत् ॥ २९ ॥

हे संसारी मूढ ! तू अपने देहमें विद्यमान मङ्गलमय ब्रह्मरूप निर्णय किये हुए देहातीत आत्माको क्यों शून्य ज्ञान करै है ? ॥ २९ ॥

देहात्मवादका निराकरण ।

स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् ।
देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥ ३० ॥

ननु शून्यवादिन एवाभावापत्तेः शून्यं मास्तु, परंत्वात्मनो देहातीतत्वे प्रमाणाभावाद्देह एवात्मा स्यादित्याशंक्याह—स्वात्मानमिति । भो मूर्ख—देहात्मवादिन् चार्वाक ! त्वं स्वात्मानं स्वकीयमात्मानं पुरुषं देहातीतं देहातिरिक्तं श्रुत्या "तस्माद्वा एतस्मादन्नरसमयादन्योऽतर आत्मा" इत्यादिकया, पुनर्युक्त्या च "एकस्मिन्कर्तृकर्मविरोध" इत्यादिरूपया शृणु—अवधारय । देहातीतत्वे किमाकार आत्मेत्यत आह—सदाकारमिति । सदाकारमस्तीत्येतन्मात्रव्यवहारकारणभूत आकारो यस्य तम् । एवंविधोऽस्ति चेत्कुतो न दृश्यत इत्यत आह—सुदुर्दर्शमिति । भवादृशैः श्रुत्याचार्यश्रद्धाशून्यैः सुदुर्दर्शं सर्वथा दर्शनायोग्यम्, तस्यादृष्टरूपत्वादेवेत्यर्थः । यद्वा पूर्वश्लोकोक्तद्वितीयापेक्षया देहात्मवादिनः समाधानार्थोऽयं श्लोकः स्वात्मानमिति ॥ ३० ॥

युक्तियों करके और श्रुतियों करके आत्माको देहातीत निर्णय तौ कर । हे मूढ ! आत्मा तौ सदाकार है । 'आत्मा' है इस प्रकार व्यवहारके कारण आत्माका आकार भान होय है परन्तु तुमसे मूर्खोंके दृष्टिगोचर नहीं होय है ॥ ३० ॥

अहंशब्देन विख्यात एक एव स्थितः परः ।
स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥

तदेवाह—अहमित्यादिसप्तभिः। परः देहादन्य आत्मा अहं-शब्देन। शब्द इत्युपलक्षणं प्रत्ययस्यापि। विख्यातः प्रसिद्धः। किंलक्षण इत्यत आह—एक इति। एक एव स्थितः। एवेति प्रत्ये-कमवधारणम्। तुशब्दः पूर्वोक्तादात्मनः स्थूलदेहस्य वैलक्षण्य-द्योतकः। स्थूलो देहकः—देह एव देहकः। स्वार्थे कप्रत्ययः। कथं पुमान् पुरुषः आत्मा स्यान्न कथंचिदित्यर्थः। देहस्या-नात्मत्वे हेतुमाह—अनेकतामिति। अनेकतां परस्परं भिन्नतां प्राप्तः। एवं तमःप्रकाशवदतिविलक्षणत्वेऽपि देहस्यात्मत्वं ब्रुवन्नतिमूढत्वादुपेक्ष्य इति भावः॥ ३१॥

अहं शब्द करके कहा जाय है और एक है और सबसे उत्कृष्ट है तब किसप्रकार स्थूल अनेकताको प्राप्त देहमय होसके है?॥३१॥

अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः।
ममायमिति निर्देशात्कथं स्याद्देहकः पुमान्॥ ३२॥

तदेवातिवैलक्षण्यं दर्शयति—अहमिति। अहमहंशब्दप्रत्य-यालंबन आत्मा द्रष्टृतया शब्दादिविषयप्रकाशकतया सिद्धः-शब्दं शृणोमीत्यादिव्यवहारेण प्रसिद्धः, देहस्तु दृश्यतया शब्दादि-वत्प्रकाश्यतया स्थितः। तत्र हेतुमाह—ममेति। ममायं देह इति घटादिवत्स्वीयसंबंधितया निर्देशात्—व्यवहारात्। एवमु-भयोर्वैलक्षण्ये सति कथं देहकः पुमान् स्यादिति व्याख्यातार्थश्च-तुर्थपादः। एवमग्रेऽपि बोद्धव्यम्॥ ३२॥

' यह मेरा है ' इस प्रकार निर्देश करनेसे आत्मा द्रष्टा (देखनेवाला) देह दृश्य (देखने लायक) है इस प्रकार प्रतीत होय है । फिर आत्मा किस प्रकार देहमय हो सकै है ?॥ ३२ ॥

अहं विकारहीनस्तु देहो नित्यं विकारवान् ।
इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ॥ ३३ ॥

पुनर्वैलक्षण्यांतरमाह—अहमिति । अहं (व्याख्यातार्थः) विकारहीनः—जायतेऽस्तीत्यादिषड्विकारहीनः। तु वैलक्षण्ये। देहो नित्यं सर्वकालं विकारवान् अत्र किं प्रमाणमत आह—इतीति । इति साक्षात् प्रत्यक्षप्रमाणेन प्रतीयते अनुभूयते। एवं सति कथं स्याद्देहकः पुमानिति ॥ ३३ ॥

आत्मा विकाररहित है और देह सदा विकारवान् है ऐसा साक्षात् प्रतीत होय है, फिर किस प्रकार आत्मा देहमय होसकै है ? ॥ ३३ ॥

यस्मात्परमिति श्रुत्या तया पुरुषलक्षणम् ।
विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ ॥

एवं युक्त्या देहात्मनोर्वैलक्षण्यमुक्त्वा श्रुत्याप्याह—यस्मादिति । " यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् " तया प्रसिद्धया तैत्तिरीयश्रुत्या । श्रुत्येति करणे तृतीया । पुरुषस्यात्मनो लक्षणम् । विमूढेन विगतमूढभावेनाति चतुरेण,श्रुत्यर्थविवेचनकुशलेनेत्यर्थः । इयं कर्तरि तृतीया । विनिर्णीतं—विचार्य स्थापितम् । अन्यत्पूर्ववत् ।

यद्वा–श्रुत्येति कर्तृपदम् । अस्मिन्पक्षे विमूढेनेति देहात्मवादिनं प्रति संबोधनम् । विमूढानां इन स्वामिन् । मूर्खशिरोमणित्वादेव श्रुतिं नाद्रियस इति भावः ॥ ३४ ॥

"यस्मात्परं नापरमस्ति किञ्चित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्" इति श्रुतिः । अर्थात् जिससे पर और अपर कुछ नहीं है, जिससे और उत्कृष्ट नहीं है, जिससे कोई सूक्ष्म नहीं है, जिससे कोई प्रधान नहीं है, जो एक आत्मा वृक्षकी तरह स्तब्ध होकर स्वर्गमें वर्तमान है वही आत्मा इस सम्पूर्ण जगत्को परिपूर्ण रखता है । इस श्रुतिसे परमात्माका लक्षण निर्णय किया गया है, फिर वह आत्मा किस प्रकार देहमय हो सकता है ? ॥ ३४ ॥

सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ।
अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ३५

न केवलमनयैकया श्रुत्या विनिर्णीतं किंत्वन्ययापीत्याह–सर्वमिति । यतो हेतोः श्रुत्या वेदाख्यपरदेवतया "पुरुष एवेदं सर्वम्" इति पुरुषसंज्ञिते सूक्तेऽप्युच्यते । पुरुषलक्षणमिति पूर्वश्लोकादध्याहारः । अतः कथं स्यादिति पूर्ववत् ॥ ३५ ॥

"पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्" इति श्रुतिः । जो कुछ दृष्टिगोचर होय है सो सब आत्मस्वरूप है और जो कुछ हुआ और जो कुछ होयगा सर्व आत्मस्वरूप है । इस श्रुतिसे कहा हुआ परमात्मा देहमय किस प्रकार होसकै है ? ॥ ३५ ॥

असंगः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च ।
अनंतमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥३६॥

अपरयापि श्रुत्यैवमेव निर्णीतामित्याह—असंग इति । "असंगो ह्ययं पुरुषः" इति श्रुत्या बृहदारण्यके वाजसनेयोपनिषदि पुरुषः असंगः प्रोक्तः । देहकस्त्वनंतमलसंश्लिष्टः । कथं पुमान्स्यादिति प्राग्वत् ॥ ३६ ॥

" असंगो ह्ययं पुरुषः" आत्मा सङ्गहीन है यह बृहदारण्यक उपनिषद्की श्रुति है । इस श्रुतिसे भी आत्मा असंग सिद्ध होता है और देह नानाप्रकारके मलोंकरके लिपटा हुआ फिर किस प्रकार आत्मा देहमय होसकै है ? ॥ ३६ ॥

तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः ।
जडः परप्रकाश्योऽसौ कथं स्याद्देहकः पुमान् ॥३७॥

तत्रैवान्यप्रकारेणापि देहात्मनोर्वैलक्षण्यं निरूपितमित्याह—तत्रैवेति । तत्रैव बृहदारण्यक एवेत्यर्थः । अत्रायं पुरुषः स्वयंज्योतिर्भवतीति श्रुत्या स्वयंज्योतिः पुरुषः समाख्यातः । हीति विद्वत्प्रसिद्धिं द्योतयति । असौ घटादिवद्दृश्योऽत एव परप्रकाश्यस्तत एव जडो देहकः कथं पुमान् स्यादिति व्याख्यातम् ॥ ३७ ॥

" पूरुषो ज्योतिर्मयः" पुरुष स्वयंप्रकाश ज्योतिस्वरूप है यह श्रुति उसी बृहदारण्यक उपनिषद्में लिखी है, इससे आत्मा तो ज्योतिःस्वरूप है और देह जड है, घटादिकोंकी तरह परप्रकाश्य है फिर किस प्रकार आत्मा देहमय हो सकै है ? ॥ ३७ ॥

कर्मकाण्डियोंका अभिमत ।

प्रोक्तोऽपि कर्मकांडेन ह्यात्मा देहाद्विलक्षणः ।
नित्यश्च तत्फलं भुंक्ते देहपातादनंतरम् ॥ ३८ ॥

अथास्तामिदं ज्ञानकांडं कर्मकांडेऽपि देहात्मनोर्भेद एव निर्णीत इत्याह-प्रोक्त इति। हि यस्मात्कर्मकांडेनापि "यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिरूपेण कर्मप्रतिपादकेन वेदभागेनेत्यर्थः। आत्मा देहाद्विलक्षणः प्रोक्तः। कथमित्यत आह-नित्य इति। नित्यत्वं च कुत इत्यत आह-तदिति। देहपातादनंतरं तत्फलमनित्यं कर्मफलं यत आत्मा भुंक्तेऽतो नित्य इत्यर्थः। चकारात् न्याय-सांख्यादावप्येवमेव देहात्मनोर्भेदो वर्णित इति दर्शितम्॥ ३८॥

"यावज्जीवमग्निहोत्रं जुहुयात्।" "अहरहः सन्ध्यामुपासीत"। जबतक जिये अग्निहोत्र करै। प्रतिदिन सन्ध्या करै। इत्यादि कर्मकाण्डमें भी आत्मा देहसे अलग नित्य देहपात होनेके अनन्तर कर्मोंके फलोंका भोगनेवाला कहा है, इस प्रकार भी आत्मा देहातीत प्रतीत होय है॥ ३८॥

लिङ्गदेहकी अनात्मता।

लिंगं चानेकसंयुक्तं चलं दृश्यं विकारि च।
अव्यापकमसद्रूपं तत्कथं स्यात्पुमानयम्॥ ३९॥

नन्वेवं सति वेदांतिनामपसिद्धांतः स्यादित्यत आह-लिंगमिति। लिंगं लिंगशरीरं तत्परोक्षादिधर्मविशिष्टम् अयं नित्यापरोक्षस्वभावः पुमान् कथं स्यान्न कथंचिदित्यर्थः। चकारात् कारणशरीरमपि निराकृतम्। अनयोरपि भेदे लिंगदेहस्य वैलक्षण्यसूचकानि विशेषणान्याह-अनेकेति। अनेकसंयुक्तं देवमनुष्यादिनानास्थूलशरीरसंबंधयुक्तम्। यद्वा श्रोत्रादिबुद्ध्यंतसप्तदशकलासंयुक्तं तथा चलं चंचलं मनःप्रधानत्वादित्यर्थः। पुनर्दृश्यं "ममेदं श्रोत्रं, ममेदं मन" इत्यादिममतास्पदत्वेनात्मन उपसर्जनभूतं

च पुनर्विकारि उपचयादिमत् । अव्यापकं परिच्छिन्नमसद्रूपमात्मज्ञानकबोध्यं च । अत्रेदमाकूतम्—यद्यपि लिंगशरीराध्यासे नात्मनःकर्तृत्वभोक्तृत्वादिभावस्तथाप्यात्मनःस्वतस्तदभावाज्ञानाऽध्यासनिवृत्तावकर्तृत्वाभोक्तृत्वादिभावसिद्धिरिति वेदांतिनां न किञ्चिदपसिद्धांतोऽन्यवदिति मंगलम् ॥ ३९ ॥

लिङ्ग और कारण इन दो प्रकारका शरीर नाना प्रकारके शरीरोंके सम्बन्ध करके युक्त, चञ्चल, विकारी, एकदेशमें रहनेवाला और असत्स्वरूप है फिर किस प्रकार देहमय आत्मा होसके है ? ॥ ३९ ॥

देहात्मवादका उपसंहार ।

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः ।
सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥

इदानीं पूर्वोक्तमर्थमुपसंहरति—एवमिति । एवं पूर्वोक्तप्रकारेण देहद्वयात् स्थूलसूक्ष्मलक्षणादन्यो भिन्न आत्मा । कोऽसावित्यत आह—**पुरुष** इति । पुरि शेते इति पुरुषः शरीराधिष्ठाता तर्हि किं जीवः नेत्याह-**ईश्वर** इति।तत्र हेतुः-**सर्वात्मेति**। तर्ह्यद्वैतहानिः स्यादित्यत आह—**सर्वरूप** इति । एवं सति विकारित्वं स्यादित्यत आह—**सर्वातीत** इति । एतादृश आत्मा चेदस्ति तर्हि कुतो नोपलभ्यत इत्यत आह—**अहमिति** । अहं प्रत्यक्षोऽहंशब्दप्रत्ययालंबनत्वेन सर्वदोपलब्धिस्वरूप इत्यर्थः। तर्ह्यहंकारः स्यान्नेत्याह—**अव्यय** इति । अव्ययः अपक्षयादिविकारशून्यः । अहंकारसाक्षीति भावः ॥ ४० ॥

इस प्रकार आत्मा स्थूल और सूक्ष्म दोनों प्रकारके देहोंसे अलग है और ईश्वर है, सर्वव्यापक है, सर्वरूप है, सर्वसे अतीत है—जिससे परे और कोई नहीं है, सबसे श्रेष्ठ अहम्‌शब्द करके कहा जाय है और भूत भविष्यत् वर्तमान तीनों कालोंमें एकरस है ॥ ४० ॥

आत्म-देहविभागमें शंका ।

इत्यात्मदेहभागेन प्रपंचस्यैव सत्यता ।
यथोक्ता तर्कशास्त्रेण ततः किंपुरुषार्थता ॥ ४१ ॥

अथेदानीमात्मनो देहद्वयातिरिक्तत्वप्रतिपादनमनर्थकमिति शंकते—इतीति। इति पूर्वोक्तप्रकारेण वर्णितेनात्मदेहविभागेन प्रपंचस्यैव सत्यता यथोक्ता यथा तर्कशास्त्रेण ततः प्रपंचसत्यत्वप्रतिपादनात्किंपुरुषार्थता कुत्सितपुरुषार्थत्वम्, भयनिवृत्त्यभावादित्यर्थः । "द्वितीयाद्वै भयं भवति" इति श्रुतेः ॥४१॥

तर्कशास्त्र अर्थात् न्याय शास्त्रके माननेवालोंने इस आत्मा और देहमें भेदबुद्धिकरके न्याय शास्त्रमें जो प्रपञ्चकी सत्यता कही है अर्थात् परमाणुको नित्य मानकर ईश्वरको निमित्तकारण संसारकी उत्पत्ति मानी है, उसको स्वीकार करते हैं तिसकी अपेक्षा और पुरुषार्थता क्या होगी ? ॥ ४१ ॥

समाधान ।

इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् ।
इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥

भेदज्ञानस्याभेदज्ञानं प्रति कारणत्वादात्मदेहविभागकथनं नानर्थकमित्याह—इतीति । इति पूर्वोक्तेनात्मदेहभेदेनात्मनो देहात्पृथक्करणेन देहस्यैव प्राप्तं चार्वाकमतेनात्मत्वं तन्निवारितम् । इदानीमुत्तरग्रंथेन तस्य देहभेदस्यासत्त्वमात्मसत्तातिरिक्तसत्तारहित्यं स्फुटं स्पष्टं यथा स्यात्तथा हीति प्रसिद्धमुच्यते ॥ ४२ ॥

इस प्रकार नैय्यायिकोंने आत्माका और देहका भेद दिखाके देहका आत्मत्व निवारण किया है । अब देह आत्माके भेद असत्ता स्पष्ट दिखाते हैं ॥ ४२ ॥

देहभेदका असत्त्व निरूपण ।

चैतन्यस्यैकरूपत्वाद्भेदो युक्तो न कर्हिचित् ।
जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥

तदेवाह—**चैतन्यस्येति** । चैतन्यस्य सर्वभूतभौतिकप्रपंचाधिष्ठानप्रकाशस्य । " घटः प्रकाशते, पटः प्रकाशते " इत्यादिष्वेकरूपत्वादेकाकारत्वाद्धेतोः कर्हिचित् कस्यांचिदवस्थायामपि भेदो न युक्तो न यथार्थ इत्यर्थः । तर्हि जीवभेदः सत्यः स्यादित्यत आह—**जीवत्वमिति** । जीवत्वम्, चकारोऽप्यर्थः । मृषा मिथ्या ज्ञेयम् । तदुपाधेरेवांतःकरणादेर्मायामयत्वादित्यर्थः । अधिष्ठानसत्यत्वेन कल्पितस्य मिथ्यात्वबोधे दृष्टांतमाह—**रज्जाविति** । यथा रज्जौ तदज्ञानात् वक्रतादिसादृश्येन मंदांधकारे सर्पग्रहः सर्पबुद्धिरव्युत्पन्नस्य भवति नतु व्युत्पन्नस्य, तथैवात्मन्यात्माज्ञानात् प्रकाशसादृश्यादविशेषप्रकाशे चिज्जडग्रंथिरूपचिदाभासभ्रमो भवत्यविवेकिनां नतु विवेकिनामिति वेदांतसिद्धांतरहस्यम् ॥ ४३ ॥

चैतन्यको (भूत भौतिक प्रपञ्चका जो अधिष्ठान है उसको चैतन्य कहते हैं) एकरूप होनेसे और आत्माको चैतन्यस्वरूप होनेसे देह और आत्माका भेद कभी भी युक्तियुक्त नहीं है, जिस तरह रज्जुमें वह सर्पका भ्रम होय है वास्तवमें वह सर्प नहीं होय है तिसी प्रकार आत्मासे भिन्न जीवका मानना वृथा है ॥ ४३ ॥

चितिकी विश्वाकारता ।

रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।
भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥

इदानीं पूर्वोक्तमेव दृष्टांतं विवृण्वन् सर्वस्यापि प्रपञ्चस्य ब्रह्मरूपतामाह—रज्ज्वति । केवलेति विशेषणेन पूर्वावस्थामपरित्यज्यावस्थांतरप्राप्तिलक्षणविवर्तोपादानत्वमेवोक्तम्, नारंभोपादानत्वं नापि परिणामोपादानत्वमिति बोध्यम् । अन्यत् स्पष्टम् ॥ ४४ ॥

जिस समय रज्जुके स्वरूपका अज्ञान होय है (अर्थात् यह रज्जु है जब ऐसा ज्ञान नहीं होय है) तब रज्जुमें भ्रान्ति होय है (अर्थात् अज्ञानसे रज्जुको सर्प समझै है) इसी प्रकार जिस समयपर्यन्त आत्माका ज्ञान नहीं होय है तबतक अज्ञानवशसे आत्माके विषयमें पुरुष नाना प्रकारकी कल्पना करै है ॥ ४४ ॥

प्रपंचमें ब्रह्मकी उपादानता ।

उपादानं प्रपंचस्य ब्रह्मणोऽन्यन्न विद्यते ।
तस्मात्सर्वप्रपंचोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥

अत्र हेतुं दर्शयन् पूर्वोक्तमुपसंहरति—उपादानमिति । यस्मात्प्रपंचस्याकाशादिदेहांतस्य जगद्विस्तारस्य ब्रह्मणो मायाशबलाच्चैतन्यादन्यत्परमाणवो यद्वा प्रकृतिरुपादनं कारणविशेषो न विद्यते, " तस्माद्वा एतस्मादात्मन आकाशः संभूतः " इत्यादिश्रुतेः । तस्माद्धेतोरिति । स्पष्टमन्यत् ॥ ४५ ॥

ब्रह्मके सिवाय इस प्रपञ्चका उपादान कारण और कोई नहीं होसकै है इस कारण सम्पूर्ण प्रपञ्च ब्रह्म ही है अर्थात् सर्व संसार ब्रह्मस्वरूप है और कुछ नहीं है ॥ ४५ ॥

भेदभावकी असत्यता ।

व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।
इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥

ननु व्याप्यव्यापकतारूपे भेदे जाग्रति सति कथं प्रपंचस्य ब्रह्मतेत्याशंक्याह—व्याप्येति । व्याप्यमांतरं व्यापकं बाह्यं तयोर्भावस्तत्ता । मिथ्या घटकाशादिवत् कल्पितत्वादसन्नित्यर्थः । तत्र प्रमाणमाह—सर्वमिति । "इदं ब्रह्मेदं क्षत्रमिति प्रकृत्येदं सर्वं यदयमात्मा" इत्यादिश्रुतिरूपेश्वराज्ञाबलादित्यर्थः। ततः किमत आह—इतीति। इति ज्ञाते इत्यादि सुगमम् ॥४६॥

"ब्रह्मैव सर्वमपरं नहि किञ्चिदस्ति" जो कुछ है आत्मा है और कुछ नहीं है ऐसा कहनेसे आत्माका व्याप्यव्यापकभाव मिथ्या है ऐसा प्रतीयमान होता है इस प्रकार सर्वोत्कृष्ट अर्थात् सबसे श्रेष्ठ आत्माके जाननेपर भेदका तो अवसर ही नहीं है ॥ ४६ ॥

श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।
कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥

ननु प्रत्यक्षेण भासमानो व्याप्यव्यापकभावः कथं मिथ्येत्याशंक्याह—श्रुत्येति । नूनमिति निश्चये । हीति प्रसिद्धौ । श्रुत्या "नेह नानास्ति किंचन" इत्यादिरूपयेत्यर्थः । नानात्वं निवारितम् । तेन च नानात्वनिवारणेनाद्वयकारणेऽभिन्ननिमित्तोपादाने ब्रह्मणि स्थिते सति भासो व्याप्यव्यापकादिप्रतिभासाः, कार्यभूतोऽन्यः स्वकारणातिरिक्तः कथं भवेन्न कथंचिदित्यर्थः ॥ ४७ ॥

वेदकी श्रुति साक्षात् आप जगत्का नानात्व निवारण करै है इस प्रकार ब्रह्म अद्वितीय अर्थात् कारण होने करके किस प्रकार भेदज्ञान होसकै है ? ॥ ४७ ॥

भेदभावमें दोष ।

दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।
इह पश्यति नानात्वं मायया वंचितो नरः ॥ ४८ ॥

किंच भेददृष्टेर्दोषश्रवणादपि कारणादभिन्नमेव कार्यमित्याह–दोष इति । " मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " इत्यादिरूपया श्रुत्येत्यर्थः । तत्र मृत्योरनंतरं मृत्युं जननमरणपरंपरामित्यर्थः । स्पष्टमन्यत् ॥ ४८ ॥

" मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति " अर्थात् जो संसारको नानारूप मानै है उसको वारंवार जन्म मृत्यु नरक भोग करना पडै है । इत्यादि श्रुतिद्वारा जो नानात्व प्रदर्शन करै हैं उनको दोष होय है ऐसा भी कहा है । मनुष्य मायासे वञ्चित होकर जगत्‌के नानात्वका अनुभव करै है ॥ ४८ ॥

ब्रह्मसे जीवोंकी उत्पत्ति ।

ब्रह्मणः सर्वभूतानि जायंते परमात्मनः ।
तस्मादेतानि ब्रह्मैव भवंतीत्यवधारयेत् ॥ ४९ ॥

तर्हि किं कुर्यादित्यत आह–ब्रह्मण इति । बृहत्त्वादपरिच्छिन्नत्वाद् ब्रह्म । तद्रूपात्परमात्मनः सर्वाणि भूतानि जायन्ते उत्पद्यंते । जायंते इति स्थितिप्रलययोरप्युपलक्षणम्, "यतो वा इमानि भूतानि जायंते" इत्यादिश्रुतेः । यस्मादेवं तस्माद्धेतोरेतानि भूतानि ब्रह्मैव भवंति सन्मात्रब्रह्मरूपाणीत्यवधारयेन्निश्चिनुयादिति ॥ ४९ ॥

" यतो वा इमानि भूतानि जायन्ते " अर्थात् जिससे प्राणी उत्पन्न होते हैं इत्यादि श्रुतिसे समस्त प्राणी ब्रह्मसे ही उत्पन्न होते हैं इसीकारण सब ही ब्रह्मस्वरूप हैं ऐसा निश्चय मानिये ॥ ४९ ॥

ब्रह्मकी व्यापकता ।

ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।
कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥

ननु नानानामरूपकर्मभेदेन विचित्राणि भूतानि कथं ब्रह्मात्मकानीत्याशंक्याह–ब्रह्मैवेति। "त्रयं वा इदं नाम रूपं कर्म" इति बृहदारण्यकश्रुतिर्जगौ गायनं कृतवती, स्वाधिकारिणः श्रावयामासेत्यर्थः। किमित्यत आह–ब्रह्मैव सर्वनामान्याकाशादिदेहांतान् संज्ञाविशेषान्, च पुनर्विविधानि रूपाण्यवकाशादिद्विपदांतान् नानाविकारविशेषान्। अपिशब्दश्चार्थे। रूपग्रहणं गंधादिग्रहणस्याप्युपलक्षणम्। समग्राणि कर्माणि आकाशप्रदानादीनि स्नानशौचादीन् क्रियाविशेषानपि बिभर्त्ति। रज्ज्वादिकमिव सर्पादिप्रतिभासं दधात्यधिष्ठानदर्शनशून्यान् प्रति दर्शयतीत्यर्थः॥ ५०॥

ब्रह्म ही सम्पूर्ण प्रकारके नाम और नाना प्रकारके रूप धारण करता है और नानाप्रकारके कर्म धारण करता है। ऐसा साक्षात् श्रुति कहती है॥ ५०॥

जीव-ब्रह्मैक्यमें दृष्टान्त।

सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम्।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत्॥ ५१॥

अत्र लोकप्रसिद्धं दृष्टांतमाह–सुवर्णेति। सुगमम्॥५१॥

जिस प्रकार सुवर्णसे कटक कुण्डलादिक बनाये जाते हैं जबतक कुण्डलादि आकार रहा तबतक रहा फिर गलानेसे सुवर्णका सुवर्ण ही होजाता है इसी प्रकार यह ब्रह्मसे उत्पन्न हुआ संसार जबलों किसी आकारमें रहता है तबलों रहता है अन्तमें अज्ञान दूर होने पर ब्रह्म ही होता है॥ ५१॥

भेदभावमें भीति।

स्वल्पमप्यंतरं कृत्वा जीवात्मपरमात्मनोः।
यः संतिष्ठति मूढात्मा भयं तस्याभिभाषितम्॥५२॥

एवं कर्तृकर्मादिकारकघटस्यैकाधिष्ठानरूपत्वे सिद्धेऽपि भेददर्शिनो भयमाह–स्वल्पेति । स्वल्पमप्यंतरमुपास्योपासकरूपं भेदं कृत्वा–कल्पयित्वा यस्तिष्ठति तस्य भयं भाषितम् । " यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवति" इत्यादिश्रुत्येत्यर्थः ॥ ५२ ॥

जो पुरुष जीवात्मा और परमात्मामें कुछ भी भेद करै है और मानै है वह मूढ पुरुष भयको प्राप्त होय है अर्थात् उसके चित्तको कदापि शान्ति नहीं होय है ॥ ५२ ॥

अज्ञानसे द्वैतकी प्रतीति ।

यत्राज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति ।
आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥

ननु प्रकाशतमसोरिव परस्परविरुद्धस्वभावयोर्द्वैताद्वैतयोः कुत एकाधिकरणत्वमित्याशंक्यावस्थाभेदादित्याह–यत्रेति । यत्र यस्यामज्ञानावस्थायाम् अज्ञानेन द्वैतमिव भवेत्तत्र तस्यामज्ञानावस्थायाम् " इतरोऽन्योऽन्यत्पश्यति यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति तदितर इतरं जिघ्रति तदितर इतरं शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानातीति । यत्र वाऽन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जिघ्रेदन्योऽन्यद्रसयेत्" इत्यादिश्रुतेः। चशब्दः पूर्वोक्ताद्वैलक्षण्यं सूचयति । यदा यस्मिन् ज्ञानकाले सर्वमात्मत्वेन भवेत् तत्र तस्मिन् ज्ञानकाले इतरोऽण्वपि किञ्चिदप्यन्यन्न पश्यति । "यत्र वा, अस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्" इत्यादिश्रुतेः सकार्याज्ञाननिवृत्त्या न द्वैतमिति भावः ॥ ५३ ॥

जिस अवस्थामें अज्ञान वशसे द्वैत होय है उसी अवस्थामें एक पदार्थ दूसरे पदार्थका दर्शन करै है, जब आत्मज्ञान होजाय है तब किसीको कुछ अन्य नहीं मालूम होय है ॥ ५३ ॥

अद्वैतभावसे लाभ ।

यस्मिन्सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।
न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥५४॥

ननु द्वैतादर्शने कः पुरुषार्थ इत्याशंक्य तत्प्रतिपादिकाम् " यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः " इति श्रुतिं पठति–यस्मिन्निति । अर्थः–यस्मिन्नवस्थाविशेषे सर्वाणि भूतान्यात्मत्वेनात्मभावेन विजानतः । अपरोक्षेण साक्षात्कुर्वतोऽधिकारिणः पुरुषस्य । तस्येति षष्ठी सप्तम्यर्थे । तस्मिन्नवस्थाविशेषे वै निश्चयेन मोहो भ्रमो न भवेत्, च पुनः शोको व्याकुलतापि न भवेत् । उभयत्र हेतुः–अद्वितीयतः तत्कारणाभावादित्यर्थः ॥५४॥

जिस अवस्थामें पुरुष सर्व प्रपंचको आत्मरूप मानै है उस अवस्थामें मनुष्यको अद्वैतज्ञान होनेसे शोक मोह नहीं होय है ॥ ५४ ॥

अद्वैतकी पुष्टिमें श्रुतिप्रमाण ।

अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।
इति निर्द्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥

शोककारणद्वैताभावे प्रमाणमाह–अयमिति । " स वा अयमात्मा ब्रह्म विज्ञानमयः " इत्यादिरूपयेत्यर्थः । शेषं स्पष्टम् ॥ ५५ ॥

" स वा अयमात्मा ब्रह्मविज्ञानमयः " परमात्मस्वरूप ब्रह्म ही सर्वात्मकरूप स्थित है ऐसा बृहदारण्य उपनिषद्की श्रुतिने निश्चय किया है ॥ ५५ ॥

प्रपंचके मिथ्यात्वमें दृष्टान्त ।

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।
असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥
स्वप्नो जागरणेऽलीकः स्वप्नेऽपि जागरो नहि ।
द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥

नन्वयं लोक एव तत्कारणे सति कथं शोकाद्यभाव उच्यत इत्याशंक्य सदृष्टांतमाह–अनुभूत इति । स्पष्टम् ॥ ५६ ॥ दृष्टांतं विवृण्वन्नुक्तन्यायमन्यत्राप्यतिदिशति–स्वप्न इति । अलीको मिथ्या द्वयं स्वप्नजागरणे । लये सुषुप्तौ शेषं स्पष्टम् ५७

जिस प्रकार स्वप्नावस्थामें स्वप्नमें देखा हुआ पदार्थ सम्पूर्ण सत्स्वरूप मालूम पडै है, स्वप्नसे दूसरे क्षणमें जागते ही सब असत् स्वरूप हो जाय है इसी प्रकार इस संसारका व्यवहार सत्य मालूम होय है और असत् स्वरूप होय है । जाग्रत् अवस्थामें स्वप्न मिथ्या मालूम होय है, स्वप्न अवस्थामें जाग्रत् मिथ्या मालूम होय है और सुषुप्ति अवस्थामें स्वप्न जाग्रत् दोनों मिथ्या होय हैं । इसी प्रकार स्वप्न और जाग्रत् अवस्थामें सुषुप्ति मिथ्या प्रतीत होय है ॥ ५६ ॥ ५७ ॥

अवस्थात्रयका मिथ्यात्व ।

त्रयमेवं भवेन्मिथ्या गुणत्रयविनिर्मितम् ।
अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥५८॥

उक्तमुपसंहरन्फलितमाह--त्रयमिति । त्रयं जाग्रदाद्यवस्थात्रयमेवमुक्तपरस्परव्यभिचारेण मिथ्या । मिथ्यात्वे हेतुः-गुणेति । गुणत्रयविनिर्मितं मायाकल्पितमित्यर्थः । तर्हि किं सत्यमत आह–अस्येति । अस्य अवस्थात्रयस्य । शेषं स्पष्टम् ॥५८॥

सतोगुण, रजोगुण और तमोगुणसे बने हुए जाग्रत् स्वप्न सुषुप्ति तीनों ऊपर कहे हुए प्रकारसे मिथ्या होय हैं । इन तीनों अवस्थाओंका साक्षी गुणातीत अर्थात् गुणरहित चिन्मय अर्थात् चैतन्य स्वरूप सत्य है ॥ ५८ ॥

जीव-ब्रह्मकी एकतामें दृष्टान्त ।

यद्वन्मृदि घटभ्रांतिं शुक्तौ वा रजतस्थितिम् ।
तद्वद् ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति ॥ ५९ ॥

नन्ववस्थात्रयं मिथ्या भवतु जीवस्तु सत्यः स्यादित्याशंक्य सदृष्टांतमुत्तरमाह--यद्वदिति । ब्रह्मणि वीक्ष्यमाणे आत्मत्वेन साक्षात्कृते सति जीवत्वं न पश्यतीत्यन्वयः।अन्यत्स्पष्टमेव॥५९॥

यदि आत्मामें गुणत्रय मिथ्या है तौ जीव ही सत्य हो ? तहां कहै हैं जिस प्रकार मृत्तिकामें घटकी भ्रान्ति है परन्तु घट नष्ट होनेपर मृत्तिका ही दृष्टिगोचर होय है और जैसे शुक्तिमें चांदीकी भ्रान्ति होय है और जब समीप जाके देखै है तो सीपी होय है इसी प्रकार जबतक आत्माका ज्ञान नहीं होय तबतक जीव है ऐसी प्रतीति होय है, परन्तु ब्रह्मका साक्षात्कार होनेसे जीवको नहीं देखै है ॥ ५९ ॥

यथा मृदि घटो नाम कनके कुण्डलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥ ६० ॥

अज्ञानावस्थायां प्रतीयमानो यो जीवब्रह्मभेदः स नाममात्र इति बहुदृष्टांतैराह--यथेति । रजतस्य ख्यातिराख्या, नामेति यावत् । परे परब्रह्मणि जीवशब्दस्तथा । शेषं स्पष्टम् ॥६०॥

अज्ञान अवस्थामें जो जीव ब्रह्मका भेद भासै है सो केवल नाममात्र होय है, वस्तुतः मृत्तिका होय परन्तु घट ऐसा नाममात्र होय है और सुवर्ण होय है परन्तु कटक कुण्डल ऐसा नाममात्र होय है सीपी होय है परन्तु मायावश पुरुष रजत कहने लगै हैं, इसी प्रकार

वस्तुतः ब्रह्म होय है तब भी ब्रह्ममें जीवसंज्ञा होय है सो नाममात्र है वस्तुतः मिथ्या है ॥ ६० ॥

ब्रह्ममय संसार ।

यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥

न केवलं जीव एव नाममात्रः किंतु सर्वविश्वमपि ब्रह्मणि नाममात्रमित्यनेकदृष्टांतैराह—यथैवेति । स्पष्टम् ॥ ६१ ॥

केवल जीव ही नाममात्र नहीं है किन्तु सम्पूर्ण विश्व ही नाममात्र है । जैसे आकाशमें वस्तुतः कुछ नहीं है परन्तु नीलापन मालूम होय है और जैसे मारवाडकी भूमिमें वस्तुतः जल नहीं है परन्तु भ्रान्तीसे जल मालूम होय है और जैसे अन्धकार दोषसे रात्रिमें ठूंठ पुरुष मालूम होय है परन्तु वस्तुतः पुरुष है नहीं इसी प्रकार यह संसार परमात्मा ब्रह्मके विषे भिन्न और सत्यसा प्रतीत होय है परन्तु वस्तुतः कुछ भी नहीं है ॥ ६१ ॥

संसारकी स्थिति ।

यथैव शून्ये वैतालो गंधर्वाणां पुरं यथा ।
यथाकाशे द्विचंद्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥६२॥

नाममात्रप्रपंचस्य मिथ्यात्ववासनादार्ढ्यायेममेवार्थं बहुभिर्लोकप्रसिद्धदृष्टांतैः प्रपंचयति—यथैव शून्य इत्यादित्रिभिः । शून्ये निर्जने देशे वैतालः अकस्मादाभासमानो भूतविशेषः । गन्धर्वपुरस्यापि शून्याधिष्ठानत्वं ज्ञेयम् । गन्धर्वनगरं नाम राजनगराकारो नीलपीतादिमेघरचनाविशेषः । आकाशे द्विचन्द्रत्वम् । स्पष्टमन्यत् ॥ ६२ ॥

जिस प्रकार निर्जन स्थानमें अकस्मात् प्रत्यक्ष होकर वैताल (भूतविशेष) मालूम होय है परन्तु वस्तुतः मिथ्या होय है और जैसे निर्जन

स्थानमें नीले पीले मेघोंसे बना हुआ गन्धर्वोंका नगर मालूम होने लगै है परन्तु वह भी वस्तुतः मिथ्या होय है और जैसे आकाशमें किसी समय किसी कारण भ्रान्तिसे दो चंद्रमा मालूम होने लगै हैं इसी प्रकार सत्यस्वरूप आत्मामें जगत् सत्यसा प्रतीत होय है वस्तुतः सत्य नहीं है ॥ ६२ ॥

यथा तरंगकल्लोलैर्जलमेव स्फुरत्यलम् ।
पात्ररूपेण ताम्रं हि ब्रह्मांडौघस्तथात्मता ॥ ६३ ॥

यथा तरंगेति सुगमम् ॥ ६३ ॥

जिसप्रकार जल ही तरङ्गरूप देखनेमें आवे है और ताम्र ही पात्राकार देखनेमें आवे है इसीप्रकार आत्मा ही ब्रह्माण्डाकार होकर दृष्टिगोचर होय है ॥ ६३ ॥

घटनाम्ना यथा पृथ्वी पटनाम्ना हि तंतवः ।
जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥

घटेति । तत्र पादत्रयं स्पष्टम् । ननु किमनेन मिथ्यात्ववासनादार्ढ्येनेत्यत आह—ज्ञेयमिति । तदभावतो नामाभावतस्तद्ब्रह्म ज्ञेयम् । " वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्यादिश्रुतेः ॥ ६४ ॥

जैसे संसारमें मृत्तिका घटनाम करके प्रसिद्ध होय है और तन्तु पटनाम करके प्रसिद्ध होय है इसीप्रकार जीव नाम करके संसार चिद्रूप आत्मा प्रसिद्ध होय है । सो मिथ्या है क्योंकि संसारके व्यवहारके वास्ते नाम संकेतमात्र होय हैं ॥ ६४ ॥

ब्रह्ममय व्यवहार ।

सर्वोऽपि व्यवहारस्तु ब्रह्मणा क्रियते जनैः ।
अज्ञानान्न विजानंति मृदेव हि घटादिकम् ॥ ६५ ॥

ननु "यत्र हि द्वैतमिव भवति" इत्यादिश्रुत्यर्थदर्शने-नावस्थात्रये विदेहमोक्षावुक्तौ नतु जीवन्मोक्ष इत्याशंकयाह-सर्व इति । सर्वोऽपि लौकिको वैदिकश्चेति । शेषं स्पष्टम् । अयं भावः-अज्ञाननिवृत्तिरेव जीवन्मुक्तिर्नतु द्वैतादर्शनमिति ॥ ६५ ॥

लोककी जीवन्मोक्ष अवस्था दिखावैं हैं क्योंकि ("यत्र हि द्वैतमिव भवति") जिसमें ज्ञान होनेपर द्वैतकेसा व्यवहार किया जाय है वह जीवन्मोक्ष विदेह 'मोक्ष' से विलक्षण तीसरी अवस्था कहलावै है तिस जीवन्मोक्ष अवस्थामें सब लोक परब्रह्मके नियमानुसार सब प्रकार लौकिक और वैदिक कार्य्य करै है ऐसा है संसारी पुरुष तबभी अज्ञानवशसे कोईभी ब्रह्मको जाननेको समर्थ नहीं होय है । जैसे यद्यपि घट मृत्तिका ही है तथापि मृत्तिका कहनेको समर्थ नहीं होय है । आशय यह है कि लोक यह नहीं जाने है कि लोकव्यवहारके ही कारण द्वैत व्यवहार किया जाय है, वस्तुतः अज्ञानकी निवृत्तिका नाम ज्ञान है और लोकव्यवहारमें भी अद्वैत व्यवहार करनेका नाम ज्ञान नहीं है ॥ ६५ ॥

विश्व और ब्रह्ममें कार्यकारणता ।

कार्यकारणता नित्यमास्ते घटमृदोर्यथा ।
तथैव श्रुतियुक्तिभ्यां प्रपंचब्रह्मणोरिह ॥ ६६ ॥

तत्र हेतुं सदृष्टांतमाह-कार्येति । यथा "सौम्यैकेन मृत्पिडेन सर्वं मृन्मयं विज्ञातं स्यात्" इत्यादिश्रुतिः । युक्तिस्तु कार्यकारणयोरन्यत्वे एककारणज्ञानात्सर्वकार्यज्ञानं न स्यादित्यादि । सुगममन्यत् ॥ ६६ ॥

जैसे सदा घट और मृत्तिकाका कार्य्यकारण भाव देखनेमें आवै है तिसी प्रकार श्रुतियोंसे और युक्तियोंसे प्रपञ्च अर्थात् जगत् और ब्रह्मका कार्य्यकारण भाव जाना जाय है ॥ ६६ ॥

गृह्यमाणे घटे यद्वन्मृत्तिकायाति वै बलात् ।
वीक्ष्यमाणे प्रपंचेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥

कार्यकारणयोरनन्यत्वमेव दृष्टांतेन स्पष्टयति-गृह्यमाणइति । भासुरं प्रमाणनिरपेक्षतयैव भासनशीलम् । स्पष्टमन्यत् ॥६७॥

जैसे घटके विषयमें विचार करते करते अन्तमें मृत्तिका ही निश्चय होय है, इसी प्रकार इस संसारके विषयमें विचार करते करते विना प्रमाणोंकेही प्रकाशवान् ब्रह्म प्रतीत होय है ॥ ६७ ॥

आभासमें द्वैविध्य ।

सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा ।
यथैव द्विविधा रज्जुर्ज्ञानिनोऽज्ञानिनोऽनिशम् ॥६८॥

ननु ब्रह्मणि भासमाने प्रपंचो न भासेतेत्याशंक्यावस्थाभेदेनोभयमपि भासत इति सदृष्टांतमाह—सदैवेति । तत्र ज्ञानिनः सदैवात्मा विशुद्धः । अज्ञानतत्कार्यप्रपंचमलरहितत्वान्निष्प्रपंचोऽस्तीत्यर्थः । अज्ञानिनस्तु सदैवाशुद्धोऽस्तीति भ्रमाद्विभाति । वै हीति तत्प्रसिद्धौ । उभयत्रापि दृष्टांतः--यथेति । यथा रज्जुर्ज्ञानिनः सर्पाभावतया निर्विषत्वेनाभयंकरी । अज्ञानिनस्तु सर्परूपतया विपरीतत्वेन भयंकरीति द्विविधा भाति । अयं भावः—ब्रह्म यद्यपि स्वयंप्रकाशत्वेन सदा भात्येव तथापि वृत्त्या रूढत्वेन पुरुषार्थोपयोगीति ज्ञानिनः प्रतिभाति नाज्ञानिनः, सूर्यदीपादिरिव चक्षुष्मदंधयोरिति दिक् ॥ ६८ ॥

जैसे एक ही रज्जु अज्ञानी पुरुषोंको भ्रमसे सर्प मालूम होय है और ज्ञानवान् पुरुषोंको रज्जु ही मालूम हो जाय है इसीप्रकार एक ही

परमात्मा सर्वदा ज्ञानियोंको शुद्धस्वरूप और प्रकाशवान् मालूम होय है और अज्ञानियोंको शुद्धस्वरूप और प्रकाशवान् नहीं मालूम होय है, वस्तुतः परमात्मा शुद्धस्वरूप और प्रकाशवान् है ॥ ६८ ॥

आत्मानात्मविभागका मिथ्यात्व ।

यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः ।
आत्मानात्मविभागोऽयं मुधैव क्रियतेऽबुधैः ॥ ६९ ॥

नन्वात्मा यदि सदैव निष्प्रपंचत्वेन भाति तर्हि किमर्थं देहात्मभेदो वर्णित इत्याशंक्याविवेकिनो देहव्यतिरिक्तात्मबोधार्थं विवेकिनस्तु व्यर्थ एवेति सदृष्टांतमाह--यथेति । तत्राबुधैरित्यकारप्रश्लेषे मुधैव क्रियते अपितु नेति काकुव्याख्यानम् । अन्यत्सर्वं सुगमम् ॥ ६९ ॥

यदि आत्मा सदा निष्प्रपञ्च भासमान होय है तब आत्मा और देहका भेद क्योंकर दिखाया है ? ऐसी शंका होनेपर कहै हैं-जैसे कुम्भ मृत्तिकामय होय है तिसीप्रकार देह चैतन्यस्वरूप आत्ममय होय है इसीकारण ज्ञानी पुरुषको तौ आत्मा और देहका भेद मिथ्या है ॥ ६९ ॥

देहतादात्म्यका निरूपण ।

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७० ॥

इदानीमविवेकिनः कल्पितदेहतादात्म्यं सदृष्टांतमाह-सर्पत्वेनेति ॥ ७० ॥

जिस प्रकार अज्ञानी पुरुष रज्जुको सर्प मान लेय है और सीपीको चांदी मान लेय है इसी प्रकार आत्माको देहरूप अज्ञानी निर्णय करै है ॥ ७० ॥

घटत्वेन यथा पृथ्वी पटत्वेनैव तंतवः।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७१ ॥

घटत्वेनेति स्पष्टम् ॥ ७१ ॥

जैसे अज्ञानी पुरुष मृत्तिकाको घट मानै है और तन्तुओंको पट मानै है तिसी प्रकार आत्माको देहरूप निर्णय करै है ॥ ७१ ॥

कनकं कुंडलत्वेन तरंगत्वेन वै जलम्।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७२ ॥

कनकमिति ॥ ७२ ॥

जिस प्रकार अज्ञानी पुरुष सुवर्णको कुंडल मानै है और जलको तरंगरूप मानै है तिसी प्रकार आत्माको देहरूप निर्णय करै है ॥ ७२ ॥

पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७३ ॥

पुरुषत्व इति स्पष्टम् ॥ ७३ ॥

जिस प्रकार अज्ञानी पुरुष शाखाहीन वृक्ष अर्थात् ठूंठवृक्षको पुरुषरूप मानै है और मरुमरीचिकाको जलरूप मानै है तिसी प्रकार आत्माको देहरूप निर्णय करै है ॥ ७३ ॥

गृहत्वेनैव काष्ठानि खड्गत्वेनैव लोहता।
विनिर्णीता विमूढेन देहत्वेन तथात्मता ॥ ७४ ॥

गृहत्वेनेति। सर्पत्वेनेत्यादि पंचानामप्येतेषां श्लोकानामर्थः स्फुटतर एवास्त्यतो न व्याख्यानं कृतम् ॥ ७४ ॥

जिसतरह बहुत सारे काष्ठोंके समूहको अज्ञानी घर मान लेय हैं और लोहेको तलवार मान लेय है तिसीप्रकार आत्माको देहरूप निर्णय करै है ॥ ७४ ॥

आत्मामें देहत्वका निर्णय ।

यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७५ ॥

नन्वन्यथा निर्णये किं कारणमिति चेत्तदज्ञानमेवेति सदृष्टांतमाह—यथा वृक्षेत्यादि द्वादशभिः ॥ ७५ ॥

जिस जलमें वृक्षकी छाया पडै है और अज्ञानी पुरुष उस प्रतिबिम्बको ही साक्षात् वृक्ष मान लेय तिसी प्रकार अज्ञान वशसे इस आत्मामें देहका ज्ञान है ॥ ७५ ॥

पोतेन गच्छतः पुंसः सर्वं भातीव चंचलम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥

पोतेनेति । पोतेन नौकया । स्पष्टमन्यत् ॥ ७६ ॥

जिस प्रकार जहाज या नौकामें चढकर जानेवाले पुरुषको सब चलता हुआ मालूम होय है तिसी प्रकार अज्ञानवशसे इस आत्मामें देहका ज्ञान है ॥ ७६ ॥

पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥

पीतत्वमिति ॥ ७७ ॥

जिस प्रकार किसी पुरुषको पित्तदोषसे कमलवायु हो जाय है और श्वेत वस्तु भी पीली मालूम होने लगै है तिसी प्रकार अज्ञान वशसे इस आत्मामें देहका ज्ञान है ॥ ७७ ॥

चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥

चक्षुर्भ्यामिति ॥ ७८ ॥

जिस प्रकार किसी पुरुषके नेत्रोंमें भ्रम होय है अर्थात् घूमनेकी बेमारी होय है उस पुरुषको सम्पूर्ण पदार्थ घूमते हुए मालूम होय हैं तिसी प्रकार अज्ञानवशसे इस आत्मामें देहका ज्ञान है ॥ ७८ ॥

अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥

अलातमिति ॥ ७९ ॥

जिस प्रकार जला हुआ मुराड घुमानेसे वह सूर्यकी नाईं वर्त्तुलाकार मालूम होय है तिसी प्रकार अज्ञानवशसे इस आत्मामें देहका ज्ञान है ॥ ७९ ॥

महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८० ॥

महत्त्व इति । हीति सर्वलोकप्रसिद्धौ ॥ ८० ॥

जिस प्रकार बहुत बडी वस्तु भी अत्यन्त दूरसे अतिसूक्ष्मकी तरह दखै है तिसी प्रकार अज्ञानवशसे इस आत्मामें देहका ज्ञान है ॥ ८० ॥

सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८१ ॥

सूक्ष्मत्वे इति ॥ ८१ ॥

जिस प्रकार अतिसूक्ष्म वस्तुओंका भी उपनेत्र अर्थात् दूरबीन आदिसे अतिस्थूल वस्तुकी तरह बोध होय है तिसी प्रकार अज्ञानवशसे इस आत्मामें देहका ज्ञान है ॥ ८१ ॥

काचभूमौ जलत्वं वा जलभूमौ हि काचता ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८२ ॥

काचभूमाविति ॥ ८२ ॥

जिस प्रकार काँचकी भूमिमें जलकी बुद्धि होय है और जलकी भूमिमें काँचकी बुद्धि होय है तिसी प्रकार अज्ञान वशसे आत्मामें देहज्ञान है ॥ ८२ ॥

यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८३ ॥

यद्वदिति ॥ ८३ ॥

जिस प्रकार भ्रमसे अग्निमें मणिकी बुद्धि होय है और मणिमें अग्निकी बुद्धि होय है तिसी प्रकार अज्ञान वशसे आत्मामें देहका ज्ञान है ॥ ८३ ॥

अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८४ ॥

अभ्रेष्विति ॥ ८४ ॥

जिस प्रकार आकाशमें मेघोंके दौडनेसे चन्द्रमा दौडतासा मालूम होय है तिसी प्रकार अज्ञान वशसे आत्मामें देहका ज्ञान है ॥ ८४ ॥

यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८५ ॥

यथेति । यथा वृक्षेत्यादिश्लोकानां स्फुटार्थत्वात्पिष्टपेषणतुल्यत्वेन न व्याख्यानं कृतम् ॥ ८५ ॥

जिस प्रकार मोह वशसे किसीको दिशाओंमें भ्रम होय है तिसी प्रकार अज्ञान वशसे आत्मामें देहका ज्ञान है ॥ ८५ ॥

यथा शशी जले भाति चंचलत्वेन कस्यचित् ।
तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८६ ॥

यथा शशीति । शशीत्युपलक्षणं सूर्यादीनामपि । शेषं स्पष्टम् ॥ ८६ ॥

जिस प्रकार किसीको किसी समय जलके हिलनेसे चन्द्रका प्रतिबिम्ब हिलनेसे चन्द्रमा हिलै है ऐसा बोध होय इसी प्रकार अज्ञान वशसे आत्मामें देहका ज्ञान है ॥ ८६ ॥

ज्ञानसे देहाध्यासकी निवृत्ति ।

एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।
सैवमात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥

एवं द्वादशभिः श्लोकैरुक्तमर्थमुपसंहरति-एवमिति । एवमुक्तेन प्रकारेणात्मन्यविद्यातः आत्माऽज्ञानात् देहाध्यासो मनुष्योऽहमित्यादिबुद्धिर्जायते भवति । हीति प्रसिद्धौ । नन्वेतस्य निवृत्तिः कुतो भवेदिति चेदात्मज्ञानादेवेत्याहोत्तरार्धेन—स इति । स एव देहाध्यास एवात्मपरिज्ञानात् ब्रह्मात्मैक्यसाक्षात्कारात्परात्मनि अज्ञानतत्कार्यरहिते प्रत्यगभिन्ने ब्रह्मणि लीयते ब्रह्मस्वरूपेणावतिष्ठते । नह्यधिष्ठानं विनाऽऽरोपितस्य स्वरूपमस्ति । चकारादध्यासकारणमज्ञानमपि लीयते इति। अन्यथाऽध्यासलयाभावादित्यर्थः । नहि कारणे सति कार्यस्य लयः संभवति । तस्मादात्मज्ञानादेव सकारणकार्याध्यासनिवृत्तिरित्यलं पल्लवितेन ॥ ८७ ॥

इस प्रकार आत्मामें देहाध्यास अर्थात् देह ज्ञान होय है और जब आत्माका तत्त्वपरिज्ञान होय है तब वह देहाध्यास परमात्मामें लीन होजाय है अर्थात् देहका ज्ञान आत्मज्ञानमें लय होजाय है ॥ ८७ ॥

सर्वमात्मतया ज्ञातं जगत्स्थावरजंगमम् ।
अभावात्सर्वभावानां देहस्य चात्मता कुतः ॥ ८८ ॥

एतदेव विवृणोति-सर्वमिति । आत्मता देहस्य नेत्यर्थः । स्पष्टमन्यत् ॥ ८८ ॥

जब स्थावर जङ्गम सम्पूर्ण जगत् आत्मस्वरूप मालूम होने लगै है तब सब पदार्थोंके अनित्य होनेसे देहकी आत्मता किस प्रकार होसकै है अर्थात् कभी भी नहीं होय है ॥ ८८ ॥

आत्मविचारकी कर्तव्यता ।

आत्मानं सततं जानन्कालं नय महाद्युते ।
प्रारब्धमखिलं भुंजन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥

ननु ज्ञानिनो निष्प्रपंचात्मतया मम किं स्यात् ब्रह्मण्यभोजनेनान्यस्तृप्यतीति चेदत आह—आत्मानमिति । भो महाद्युते ! [कामादिपराभवेन स्वहितसाधनोन्मुखश्चेत्तर्हि] त्वम् आत्मानं प्रत्यगभिन्नं सततम् आसुप्तिमृतिपर्यंतं जानन् वेदांतवाक्यैर्विचारयन् कालं नय अतिक्रामस्व । विचारसाध्यज्ञानानंतरं चाखिलं प्रारब्धं चरमदेहारंभकं कर्म भुंजन् सुखदुःखाभासानुभवेन क्षपयन् समुद्वेगं कर्तुं नार्हसीत्युपदेशः ॥ ८९ ॥

हे महामते ! सदा आत्माको जानता हुआ समयको व्यतीत कर और समस्त प्रारम्भ किये हुए कर्मके फलको भोगता हुआ उद्वेग मत कर ॥ ८९ ॥

प्रारब्धकर्मका निराकरण ।

उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुंचति ।
इति यच्छ्रुते शास्त्रे तन्निराक्रियतेऽधुना ॥ ९० ॥

वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः, भोगाभावे कुत उद्वेगकारणम्, तदभावे च कुतस्तरां तन्निषेधोपदेश इति वेदांतसिद्धांतरहस्यं वक्तुं प्रतिजानत आचार्याः-उत्पन्न इति । अत्रेयं प्रक्रिया, जगत्प्रतीतिस्त्रिधा—शास्त्रीया, लौकिकी, आनुभाविकी चेति । तत्राद्या पारमार्थिकी, द्वितीयाऽपारमार्थिकी[1], तृतीया तु प्रातिभासिकी । तासां निवृत्तिस्तु क्रमात् वेदांतश्रवणादित्रैयसाक्षात्कारप्रारब्धक्षयैर्भवति नान्यथेति । तत्रेयं प्रतिज्ञाऽन्यप्रतीत्यभिप्रायेणेति ज्ञातव्यम् । श्लोकार्थस्तु स्फुट एव ॥९०॥

आत्मज्ञान होने पर भी पुरुष कर्मफलका त्याग नहीं करै है ऐसा शास्त्रोंमें सुननेमें आवे है, उसका अब हम निराकरण अर्थात् खण्डन करै हैं ॥ ९० ॥

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्त्वात्तु यथा स्वप्नो विबोधतः ॥ ९१ ॥

तदेवाह—तत्त्वेति । ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इति श्लोकार्थः । पदार्थस्तु स्फुट एव ॥ ९१ ॥

तत्त्वज्ञानके अनन्तर प्रारब्ध अर्थात् कर्मफल नहीं रहता है, क्योंकि जैसे स्वप्नमें नानाप्रकार विचित्र विचित्र प्रकार देखनेमें आवै हैं और जब पुरुष जागै है तौ सब झूठे होजाय हैं इसी प्रकार आत्मज्ञान होनेसे देहादि असत् स्वरूप मालूम होने लगै हैं और जब देहादिक असत् हुए तब प्रारब्ध कर्म और उनके फल भी असत्स्वरूप हो जाय हैं ॥ ९१ ॥

---

१ व्यावहारिकी । २ श्रवण, मनन और निदिध्यासन ।

कर्म जन्मांतरीयं यत्प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मांतराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥

इदानीं प्रारब्धशब्दं व्युत्पादयन्नुक्तमुपसंहरति-कर्मेति । तत्र कर्म त्रिविधम्-संचितक्रियमाणप्रारब्धभेदात् । तन्मध्ये भाविदेहारंभकं संचितम्, तथा वर्तमानदेहनिर्वर्त्त्यं क्रियमाणम् । प्रारब्धं तु वर्तमानदेहारंभकम् । तत्र यद्यपि संचितं जन्मांतरीयमेव तथापि भाविदेहस्य तत्प्रारब्धमेव भवति । तेनेदं सिद्धमात्मनः स्वतः कर्तृत्वाभावात्कालत्रयेऽपि जन्म नास्तीति सर्वमवदातम् ॥ ९२ ॥

पूर्व जन्मके कर्म्म प्रारब्ध कहावै हैं और जब पुरुषको तत्त्वज्ञान होय है फिर जन्म नहीं होय है । यदि जन्म नहीं हुआ तौ कर्मका भोक्ता कौन होय ? इस कारण तत्त्वज्ञान होनेके अनन्तर पुरुष कर्मफलका भोक्ता नहीं होय है, जन्म नहीं होनेमें यह श्रुति प्रमाण है-"न स पुनरावर्त्तते" ॥ ९२ ॥

स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः॥९३॥

पूर्वोक्तं दृष्टांतं विवृण्वन्सकारणजन्माभावे युक्तिमाह-स्वप्नेति । जन्माभावे तत्प्रारब्धं कुतः । स्पष्टमन्यत् ॥ ९३ ॥

स्वप्नके देहकी तरह यह देह अध्यस्त (विनष्ट) है फिर जन्म किस प्रकार होसकै है इससे किस प्रकार प्रारब्ध अर्थात् पूर्व जन्मके कर्मफलको भोग सकै है । क्योंकि जब जन्म होय तो कर्म भोगै जन्म ही नहीं तौ कर्म कहां ? ॥ ९३ ॥

ज्ञानसे प्रपंचकी निवृत्ति ।

उपादानं प्रपंचस्य मृद्भांडस्येव कथ्यते ।
अज्ञानं चैव वेदांतैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥

ननु देहादिप्रपंचस्य "यतोवा०" इत्यादिश्रुतेः सत्यब्रह्मजन्यत्वात्कथं प्रातिभासिकत्वमिति चेदुच्यते—उपादानमिति । अत्र कारणं द्विविधम्—निमित्तोपादानभेदात् । तत्र निमित्तं नामोत्पत्तिमात्रकारणम् । उपादानं तूत्पत्तिस्थितिलयकारणम् । तत्र वेदांतैः—'मायां तु प्रकृतिं विद्यात्' इत्यादिभिः प्रपंचस्योपादानमज्ञानं पठ्यते, चकाराद्ब्रह्मापि । अत्रायं भावः—न केवलं ब्रह्मैव जगत्कारणम्, निर्विकारत्वात् । नापि केवलमज्ञानम्, जडत्वात् । तस्मादुभयं मिलित्वैव जगत्कारणं भवतीति । " सत्यानृते मिथुनीकरोति " इत्यादिश्रुतेः । तत्र दृष्टांतः-भांडस्य घटकरकादेर्मृदिव मृत्पिंड इव । तत्र जलस्थाने ब्रह्म, पिंडीकरणसामर्थ्यसाम्यात् । अज्ञानं तु मृत्तिकास्थाने, आवरकत्वसाम्यात् । तत्र ब्रह्मणोऽविनाशित्वाद्ब्रह्मज्ञानेन तस्मिन्नज्ञान एव नष्टे सति विश्वता जीवजगदीश्वरात्मकजगद्भावः क्व, न क्वाप्यस्तीत्यर्थः ॥ ९४ ॥

जैसे घटके मृत्तिका और जल दो उपादान कारण हैं इसी प्रकार प्रपञ्चके भी ब्रह्म और अज्ञान दो उपादान कारण हैं ऐसा वेदान्त शास्त्रोंके प्रमाणसे जाना जाय है और जब उपादान स्वरूप अज्ञानहीका नाश होगया तो फिर संसार कहां और जब संसार नहीं तो कर्म्मभोग भी नहीं ॥ ९४ ॥

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥

मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टांतं प्रपंचयति—यथा-रज्जुमिति ॥ ९५ ॥

जैसे भ्रम वशसे रज्जुमें सर्पका ज्ञान होजाय और सर्पमें रज्जुज्ञान होनेसे मूढ पुरुष सर्पको पकड लेय हैं तिसी प्रकार सत्स्वरूप ब्रह्मको नहीं जानके जगत्को सत्स्वरूप मानै है और फँस रहे है ॥ ९५ ॥

रज्जुरूपे परिज्ञाते सर्पखंडं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां गतः ॥ ९६ ॥
देहस्यापि प्रपंचत्वात्प्रारब्धावस्थितिः कुतः ।

इदानीं यदुक्तं 'तस्मिन्नष्टे क्व विश्वता' इति तत् प्रपंचयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टांतमुपसंहरति सार्द्धेन—रज्जुरूप इति । स्पष्टम् ॥ ९६ ॥

जैसे रज्जुमें रज्जुका ज्ञान होनेसे सर्पज्ञान नहीं रहै है तिसी प्रकार प्रपञ्चके अधिष्ठानभूत परमात्माके ज्ञान होने पर प्रपञ्च मिथ्या मालूम होय है ॥ ९६ ॥

अज्ञानियोंके लिये प्रारब्ध ।

अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥९७॥

किंच देहस्येति जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावे सति "अत्र ब्रह्म समश्नुते" इत्यादिश्रुतिः प्रारब्धं किमर्थं वक्तीति चेदुच्यते अर्द्धेन—अज्ञानीति । श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यन्वयः । ज्ञानेन सर्वव्यवहारकारणेऽज्ञाने नष्टे सति ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धादिति तद्बोधार्थमिति । शेषं स्पष्टम् ॥ ९७ ॥

वस्तुतस्तु प्रारब्धमेव नास्ति कुतो भोगः, भोगाभावे कुत उद्वेगकारणम्, तदभावे च कुतस्तरां तन्निषेधोपदेश इति वेदांतसिद्धांतरहस्यं वक्तुं प्रतिजानत आचार्याः-उत्पन्न इति । अत्रेयं प्रक्रिया, जगत्प्रतीतिस्त्रिधा—शास्त्रीया, लौकिकी, आनुभाविकी चेति । तत्राद्या पारमार्थिकी, द्वितीयाऽपारमार्थिकी[1], तृतीया तु प्रातिभासिकी । तासां निवृत्तिस्तु क्रमात् वेदांतश्रवणादित्रैय[2]साक्षात्कारप्रारब्धक्षयैर्भवति नान्यथेति । तत्रेयं प्रतिज्ञाऽन्यप्रतीत्यभिप्रायेणेति ज्ञातव्यम् । श्लोकार्थस्तु स्फुट एव ॥९०॥

आत्मज्ञान होने पर भी पुरुष कर्म्मफलका त्याग नहीं करै है ऐसा शास्त्रोंमें सुननेमें आवे है, उसका अब हम निराकरण अर्थात् खण्डन करै हैं ॥ ९० ॥

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।
देहादीनामसत्त्वात्तु यथा स्वप्नो विबोधतः ॥ ९१ ॥

तदेवाह—तत्त्वेति । ज्ञानेन सर्वव्यवहारकारणाज्ञाननिवृत्तौ प्रारब्धाभाव इति श्लोकार्थः । पदार्थस्तु स्फुट एव ॥ ९१ ॥

तत्त्वज्ञानके अनन्तर प्रारब्ध अर्थात् कर्म्मफल नहीं रहता है, क्योंकि जैसे स्वप्नमें नानाप्रकार विचित्र विचित्र प्रकार देखनेमें आवै हैं और जब पुरुष जागै है तौ सब झूठे होजाय हैं इसी प्रकार आत्मज्ञान होनेसे देहादि असत् स्वरूप मालूम होने लगै हैं और जब देहादिक असत् हुए तब प्रारब्ध कर्म्म और उनके फल भी असत्स्वरूप हो जाय हैं ॥ ९१ ॥

---

१ व्यावहारिकी । २ श्रवण, मनन और निदिध्यासन ।

कर्म जन्मांतरीयं यत्प्रारब्धमिति कीर्तितम् ।
तत्तु जन्मांतराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥

इदानीं प्रारब्धशब्दं व्युत्पादयन्नुक्तमुपसंहरति-कर्मेति । तत्र कर्म त्रिविधम्-संचितक्रियमाणप्रारब्धभेदात् । तन्मध्ये भाविदेहारंभकं संचितम्, तथा वर्तमानदेहनिर्वर्त्त्यं क्रियमाणम् । प्रारब्धं तु वर्तमानदेहारंभकम् । तत्र यद्यपि संचितं जन्मांतरीयमेव तथापि भाविदेहस्य तत्प्रारब्धमेव भवति । तेनेदं सिद्धमात्मनः स्वतः कर्तृत्वाभावात्कालत्रयेऽपि जन्म नास्तीति सर्वमवदातम् ॥ ९२ ॥

पूर्व जन्मके कर्म्म प्रारब्ध कहावै हैं और जब पुरुषको तत्त्वज्ञान होय है फिर जन्म नहीं होय है । यदि जन्म नहीं हुआ तौ कर्मका भोक्ता कौन होय ? इस कारण तत्त्वज्ञान होनेके अनन्तर पुरुष कर्मफलका भोक्ता नहीं होय है, जन्म नहीं होनेमें यह श्रुति प्रमाण है–"न स पुनरावर्त्तते" ॥ ९२ ॥

स्वप्नदेहो यथाध्यस्तस्तथैवायं हि देहकः ।
अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः॥९३॥

पूर्वोक्तं दृष्टांतं विवृण्वन्सकारणजन्माभावे युक्तिमाह-स्वप्नेति। जन्माभावे तत्प्रारब्धं कुतः । स्पष्टमन्यत् ॥ ९३ ॥

स्वप्नके देहकी तरह यह देह अध्यस्त (विनष्ट) है फिर जन्म किस प्रकार होसकै है इससे किस प्रकार प्रारब्ध अर्थात् पूर्व जन्मके कर्मफलको भोग सकै है । क्योंकि जब जन्म होय तो कर्म भोगै जन्म ही नहीं तौ कर्म कहां ? ॥ ९३ ॥

ज्ञानसे प्रपंचकी निवृत्ति ।

उपादानं प्रपंचस्य मृद्भांडस्येव कथ्यते ।
अज्ञानं चैव वेदांतैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥

ननु देहादिप्रपंचस्य "यतोवा०" इत्यादिश्रुतेः सत्यब्रह्मजन्यत्वात्कथं प्रातिभासिकत्वमिति चेदुच्यते—उपादानमिति । अत्र कारणं द्विविधम्—निमित्तोपादानभेदात् । तत्र निमित्तं नामोत्पत्तिमात्रकारणम् । उपादानं तूत्पत्तिस्थितिलयकारणम् । तत्र वेदांतैः—'मायां तु प्रकृतिं विद्यात्' इत्यादिभिः प्रपंचस्योपादानमज्ञानं पठ्यते, चकाराद्ब्रह्मापि । अत्रायं भावः—न केवलं ब्रह्मैव जगत्कारणम्, निर्विकारत्वात् । नापि केवलमज्ञानम्, जडत्वात् । तस्मादुभयं मिलित्वैव जगत्कारणं भवतीति । " सत्यानृते मिथुनीकरोति " इत्यादिश्रुतेः । तत्र दृष्टांतः-भांडस्य घटकरकादेर्मृदिव मृत्पिंड इव । तत्र जलस्थाने ब्रह्म, पिंडीकरणसामर्थ्यसाम्यात् । अज्ञानं तु मृत्तिकास्थाने, आवरकत्वसाम्यात् । तत्र ब्रह्मणोऽविनाशित्वाद्ब्रह्मज्ञानेन तस्मिन्नज्ञान एव नष्टे सति विश्वता जीवजगदीश्वरात्मकजगद्भावः क्व, न क्वाप्यस्तीत्यर्थः ॥ ९४ ॥

जैसे घटके मृत्तिका और जल दो उपादान कारण हैं इसी प्रकार प्रपञ्चके भी ब्रह्म और अज्ञान दो उपादान कारण हैं ऐसा वेदान्त शास्त्रोंके प्रमाणसे जाना जाय है और जब उपादान स्वरूप अज्ञानहीका नाश होगया तो फिर संसार कहां और जब संसार नहीं तो कर्म्मभोग भी नहीं ॥ ९४ ॥

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः ॥ ९५ ॥

मिथुनीभावस्यैव जगत्कारणत्वं सदृष्टांतं प्रपंचयति-यथा-रज्जुमिति ॥ ९५ ॥

जैसे भ्रम वशसे रज्जुमें सर्पका ज्ञान होजाय और सर्पमें रज्जुज्ञान होनेसे मूढ पुरुष सर्पको पकड लेय हैं तिसी प्रकार सत्स्वरूप ब्रह्मको नहीं जानके जगत्को सत्स्वरूप मानै है और फँस रहै है ॥ ९५ ॥

रज्जुरूपे परिज्ञाते सर्पखंडं न तिष्ठति ।
अधिष्ठाने तथा ज्ञाते प्रपंचः शून्यतां गतः ॥ ९६ ॥
देहस्यापि प्रपंचत्वात्प्रारब्धावस्थितिः कुतः ।

इदानीं यदुक्तं 'तस्मिन्नष्टे क्व विश्वता' इति तत् प्रपंचयन् पूर्वोक्तं प्रारब्धाभावं सदृष्टांतमुपसंहरति सार्द्धेन-रज्जुरूप इति । स्पष्टम् ॥ ९६ ॥

जैसे रज्जुमें रज्जुका ज्ञान होनेसे सर्पज्ञान नहीं रहै है तिसी प्रकार प्रपञ्चके अधिष्ठानभूत परमात्माके ज्ञान होने पर प्रपञ्च मिथ्या मालूम होय है ॥ ९६ ॥

अज्ञानियोंके लिये प्रारब्ध ।

अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥९७॥

किंच देहस्येति जीवन्मुक्तस्य ज्ञानिनः प्रारब्धाभावे सति "अत्र ब्रह्म समश्नुते" इत्यादिश्रुतिः प्रारब्धं किमर्थं वक्तीति चेदुच्यते अर्द्धेन-अज्ञानीति । श्रुतिः अज्ञानिजनबोधार्थं प्रारब्धं वक्तीत्यन्वयः। ज्ञानेन सर्वव्यवहारकारणेऽज्ञाने नष्टे सति ज्ञानिनः कथं व्यवहार इत्यज्ञानिभिराक्षिप्ते प्रारब्धादिति तद्बोधार्थमिति । शेषं स्पष्टम् ॥ ९७ ॥

देह भी प्रपञ्चस्वरूप है और प्रपञ्चके अध्यस्त होनेसे पूर्व जन्मके कर्म कहां ? यदि कहो साक्षात् श्रुति कर्मभोगको कहै है तहां ऐसा जानना कि जिनको तत्त्वज्ञान नहीं हुआ है अज्ञानी हैं उनके बोधन करानेके वास्ते श्रुतिने कहा है ॥ ९७ ॥

ज्ञानियोंको प्रारब्धका अभाव ।

क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥९८॥

किं तर्हि ज्ञानिबोधार्थं वक्ति श्रुतिरिति चेदुच्यते—क्षीयंत इति । " भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः । क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे " इति श्रुत्या । कर्माणीति बहुत्वं यत् स्फुटं गीतं तत्तन्निषेधार्थं प्रारब्धाभावप्रतिपादनार्थम्, अन्यथा संचितक्रियमाणापेक्षया कर्मणीति द्वित्वं गेयम् । तथा न गीतमतो ब्रह्मात्मसाक्षात्कारात् चिज्जडग्रंथिभेदेन संचितक्रियमाणप्रारब्धाख्यत्रिविधकर्मक्षयांते परमपुरुषार्थं ज्ञानिबोधार्थं श्रुतिर्वक्तीति भावः ॥ ९८ ॥

जो कर्म श्रुतिने प्रतिपादन किया है वह सम्पूर्ण परात्पर परमात्माके दर्शन करनेसे अर्थात् तत्त्वज्ञान होनेसे नष्ट होजाता है । सञ्चित, क्रियमाण, प्रारब्ध, तीन प्रकारका कर्म श्रुतियोंमें कहा गया है सो कर्मका अभाव प्रतिपादन करनेके अर्थ बहुत्व दरसाया ॥ ९८ ॥

प्रारब्ध माननेमें दोष ।

उच्यतेऽज्ञैर्बलाच्चैतत्तदानर्थद्वयागमः ।
वेदांतमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥

उक्तवैपरीत्ये बाधकमाह—उच्यत इति । एतत्प्रारब्धमज्ञैः श्रुतितात्पर्यानभिज्ञैर्बलादविवेकसामर्थ्याच्चोच्यते यथार्थतया

प्रतिपाद्यते । चकारादद्वयात्मानं न पश्यंति । तदाऽनर्थद्वयागमो दोषद्वयप्राप्तिः । तत्र प्रारब्धरूपस्य द्वैतस्यांगीकारे अनिर्मोक्ष-प्रसंग एको दोषः, मोक्षाभावे ज्ञानसंप्रदायोच्छेदरूपो द्वितीयो दोष इति । न केवलं दोषद्वयस्यैव प्राप्तिरपि तु वेदांतमतहानं च । वेदांतमतस्याद्वैतस्य हानं त्यागो भविष्यति, प्रारब्धग्रहणरूपस्य द्वैतस्य याथार्थ्यादित्यर्थः । तर्हि किं प्रतिपत्तव्यमित्यत आह-यत इति । यतो यस्याः सकाशात् ज्ञानं भवति तादृशी सा श्रुतिः । ग्राह्येति शेषः । सा श्रुतिस्तु-"तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तत् ॥" इति । एतदभिप्रायः क इति चेल्लिख्यते-धीरो विवेकी ब्राह्मणो ब्रह्म भवितुमिच्छुस्तमेव वेदांतप्रसिद्धमात्मानं विज्ञायाऽऽदावुपदेशतः शास्त्रतश्च ज्ञात्वाऽनंतरं प्रज्ञां शास्त्राचार्योपदिष्टविषयामपरोक्षानुभावपर्यंतां जिज्ञासापरिसमाप्तिकरीं कुर्वीत । बहून् कर्मोपासनाप्रतिपादकान् शब्दान् वाक्यसंदर्भान्नानुध्यायान्न चिंतयेत् । तर्हि तान् ब्रूयात्किं तेनेत्याह-वाच इति । तद्द्वैतशास्त्रपठनं वाचो विग्लापनं विशेषेण श्रमकरम् । हीति सर्वानुभवसिद्धमित्यलं पल्लवितेन ॥ ९९ ॥

यदि अनभिज्ञ अर्थात् अज्ञानी पुरुष बलात्कार करके कर्म्म अर्थात् प्रारब्धको स्वीकार करै तब उनको दो दोष आवेंगे-एक तौ मोक्षका अभाव, दूसरे मोक्ष न होनेसे ज्ञानका अभाव और इस प्रकार वेदान्त मत (अद्वैतवाद) की भी हानि है, इस हेतु प्रारब्धरूप द्वैत स्वीकार करना पडेगा । अद्वैतवाद तौ हो ही नहीं सकैगा अब जिस श्रुतिसे ज्ञानलाभ होय ऐसी श्रुति कहनी होगी, यदि श्रुति नहीं कहोगे तौ और कोई ज्ञानलाभका उपाय नहीं है ॥ ९९ ॥

निदिध्यासनकी आज्ञा ।

त्रिपंचांगान्यथो वक्ष्ये पूर्वोक्तस्य हि लब्धये ।
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥

तदेवमेतावता ग्रंथसंदर्भेण मुख्याधिकारिणो वैराग्यादिसाधनचतुष्टयपूर्वकं वेदांतवाक्यविचार एव प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा मुख्यं मोक्षकारणमित्यभिहितम् । इदानीमसकृद्विचार्यापि बुद्धिमांद्यविषयासक्त्यादिप्रतिबंधेनापरोक्षज्ञानं यस्य न जायते तस्य मंदाधिकारिणो निर्गुणब्रह्मोपासनमेव मुख्यं साधनमित्यभिप्रेत्य ससाधनं ध्यानयोगं प्रतिजानत आचार्याः—त्रिपंचेति । अथोशब्दोऽधिकारिभेदार्थः । क्वचित् 'अत' इति पाठस्तस्मिन् पक्षे यतो मंदाधिकारी विचारं न लभतेऽतो हेतोरित्यर्थः । त्रिपंच त्रिगुणितानि पंच, पंचदशेत्यर्थः । तत्संख्याकान्यंगानि निदिध्यासनांगिसाधकसाधनविशेषान् यज्ञसाधकप्रयाजादिवदित्यर्थः । वक्ष्ये वक्ष्यामि । तैर्वक्ष्यमाणैः सर्वैरंगैर्निदिध्यासनमेव कार्यं नतु तूष्णीमवस्थानमुचितमित्यर्थः । निदिध्यासनकर्तव्यप्रतिज्ञाप्रयोजनमाह—पूर्वोक्तस्येति । पूर्वोक्तस्य स्वरूपावस्थानलक्षणमोक्षस्य सिद्धय इति । हीति वेदांतप्रसिद्धौ । तुशब्दः पातंजलवैलक्षण्यलक्षणेन मोक्षस्य सिद्धय इति । अनेनाष्टांगप्रतिपादकं पातंजलमवैदिकत्वाद्वैशेषिकादिवदनादेयमिति ध्वनितम् ॥ १०० ॥

इसके अनन्तर पूर्व कहे हुए ज्ञानलाभके अर्थ १५ पन्द्रह निदिध्यासनके अङ्ग कहूंगा, उन्हीं अङ्गोंके द्वारा सदा निदिध्यासन करना चाहिये ॥ १०० ॥

निदिध्यासनकी आवश्यकता ।

नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥१०१॥

मंदाधिकार्यन्यत्सर्वं कर्म सगुणोपासनविचाररूपं साधनं च विहाय श्रद्धयाचार्योक्तप्रकारेण निर्गुणं ब्रह्मैव निदिध्यासेदित्याह-नित्येति । स्पष्टम् ॥ १०१ ॥

निदिध्यासनके विना सच्चिदानन्द ब्रह्मकी प्राप्ति नहीं होय है इस कारण ब्रह्मज्ञानके जाननेकी इच्छा करनेवाला बहुत कालतक मंगलके अर्थ निदिध्यासन करै ॥ १०१ ॥

निदिध्यासनके अंग ।

यमो हि नियमस्त्यागो मौनं देशश्च कालता ।
आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः ॥१०२॥
प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यंगानि वै क्रमात् १०३

ननु कानि तान्यंगानि यैः सह निदिध्यासनं कर्त्तव्यमित्यपेक्षायां तानि निर्द्दिशति-यम इति द्वाभ्याम् । उत्तानार्थावुभावपि श्लोकौ ॥ १०२ ॥ १०३ ॥

यम, नियम, त्याग, मौन, देश, काल, आसन, मूलबन्ध, देहसाम्य, दृक्स्थिति, प्राणसंयमन, प्रत्याहार, धारणा, आत्मध्यान, समाधि, यह सम्पूर्ण अंग क्रमसे कहे हैं ॥ १०२ ॥ १०३ ॥

यमका निरूपण ।

सर्वं ब्रह्मेति विज्ञानादिंद्रियग्रामसंयमः ।
यमोऽयमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥

इदानीमेतेषां प्रत्येकं निर्देशक्रमेण स्वाभिमतानि लक्षणान्याह—सर्वमित्याद्येकविंशत्या । तत्र प्रथमोद्दिष्टं यमं तावद्दर्शयति—सर्वमिति । सर्वमाकाशादि देहांतं जगद्ब्रह्म, बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः । इति विज्ञानान्निश्चयाद्धेतोरिंद्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूहस्तस्य संयमः सम्यक् शब्दादिविषयाणां विनाशित्वसातिशयत्वदुःखदत्वादिदोषदर्शनात् यमो विषयेभ्यो निवारणम् अयं यम इति संप्रोक्तः,नतु केवलमहिंसादिरित्यर्थः । ततश्च किमत आह-अभ्यसनीय इति । अयं मुहुर्मुहुरभ्यसनीय इति॥ १०४॥

सम्पूर्ण जगत् ब्रह्म है इस प्रकार निश्चय करके सम्पूर्ण इन्द्रियोंका निग्रह करना है सो 'यम' कहावै है, इसका अभ्यास पुरुषको बारंवार करना योग्य है ॥ १०४ ॥

नियमका निरूपण ।

सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानंदो नियमात्क्रियते बुधैः ॥ १०५ ॥

एवं यमं लक्षयित्वा नियमं लक्षयति—सजातीयेति । सजातीयं प्रत्यगभिन्नं परं ब्रह्म, तदेकाकारा वृत्तिः प्रवाहः सजातीयप्रवाहः । यद्वा सजातीयानामसंगोऽहमविक्रियोऽहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः । च पुनः—विजातीयतिरस्कृतिः। विजातीयं ब्रह्मात्मविलक्षणम्, जगत्पूर्वसंस्काराज्जायमाना तदाकारा वृत्तिरित्यर्थः । तस्य तिरस्कृतिर्दोषस्मृत्याऽधिकोपेक्षाऽनादर इत्यर्थः।अयं नियम उक्तः। नतु केवलं शौचादिरित्यर्थः।

हीत्युपनिषत्प्रसिद्धौ । नन्वनयोरुपनिषत्प्रसिद्ध्या कः पुरुषार्थ इति चेदत आह—परानंद इति । ततश्च किमत आह—नियमादित्यादि । सुगमम् ॥ १०५॥

सजातीय प्रवाह अर्थात् मैं ब्रह्म हूं इस प्रकार ज्ञानका प्रवाह और विजातीयतिरस्कृति अर्थात् ब्रह्मसे अतिरिक्त सम्पूर्ण संसार मिथ्या है इस प्रकार ज्ञानको नियम कहै हैं ॥ १०५ ॥

त्यागका निरूपण ।

त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः॥१०६॥

इदानीं तृतीयं त्यागं लक्षयति—त्याग इति । प्रपंचरूपस्य प्रपंचो नामरूपलक्षणः । रूप्यते घटोऽयं पटोऽयम् इत्यादि नामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते येन तत्प्रपंचरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तस्य । चिदात्मत्वावलोकनाच्चिदजडं स्वत एव प्रकाशमानं ब्रह्म, तदात्मस्वरूपं यस्य तद्भावस्तस्यावलोकनमनुसंधानं तस्माद्धेतोर्यस्त्यागः नामरूपोपेक्षा स एव त्यागस्त्यागशब्दवाच्यः, "ईशावास्यमिदं सर्वम्" इत्यादिश्रुतेः । हीति विद्वदनुभवप्रसिद्धौ । नन्वयं त्यागो न कुत्रापि प्रसिद्ध इत्याशंक्याह—महतां पूज्य इति। तत्र हेतुः सद्य इति। यतोऽयं त्यागः सद्योऽनुसंधानकाल एव मोक्षमयः परमानंदस्वरूपावस्थानरूपः, अत एवात्मतत्त्वविदामिष्टत्वादतिप्रसिद्धोऽयं त्याग इत्यर्थः । तस्मादयमेवं मुमुक्षुणा कर्तव्यो नान्यः । केवलस्वकर्माद्यकरणरूप इति भावः । एवमग्रेऽप्यूह्यम् ॥१०६॥

चैतन्यस्वरूप तत्त्वको अवलोकन करके जो प्रपञ्चका अर्थात् घटपटादि नामसे व्यवहृत पदार्थोंका त्याग करना है सो त्याग कहावै

है इसका महात्मा लोग बडा आदर करै हैं जिस कारण यह शीघ्रही मोक्षको देय है ॥ १०६ ॥

मौनका निरूपण ।

यस्माद्वाचो निवर्तंते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १०७ ॥

अथ मौनं लक्षयति—यस्मादिति । शब्दप्रवृत्तिनिमित्त-जातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तुमशक्यं यद्ब्रह्म तथापि योगिभिर्गम्यं ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्राप्यं तत्प्रसिद्धमेव ब्रह्मरूपं मौनं सर्वदा बुधो विवेकी भवेत् । तदहमस्मीत्यनुसंदध्यादित्यर्थः ॥ १०७ ॥

जिसको वाणी और मन नहीं प्राप्त होसके हैं और योगी लोकोंको लब्ध होय है ऐसे परब्रह्मका ही नाम मौन है, पण्डित जन तिस ब्रह्मका 'मैं ब्रह्म हूं' इस प्रकार अनुसन्धान करै ॥ १०७ ॥

वाचो यस्मान्निवर्त्तंते तद्वक्तुं केन शक्यते ।
प्रपंचो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥१०८॥
इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।
गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥

नन्विदं प्रत्यगभिन्नब्रह्मानुसंधानं ध्यानरूपं चतुर्द्दशमंगं प्रतीयते इत्याशंक्य स्वारस्यात्प्रकारान्तरेण मौनमेव लक्षयति सार्द्धेन-वाच इति । अयं भावः-शब्दप्रवृत्तिनिमित्ताभावाद्ब्रह्म यथा वागविषयं तथा नामरूपजात्यादिप्रपंचोऽपि सदसदादिविकल्पासहत्वाद्वागतीतः ॥१०८॥ इतीति । इत्युक्तप्रकारेण ब्रह्मजगतोर्विवा-

दत्यागरूपंवा तन्मौनं भवेत् । केषामित्याकांक्षायां सतां चेदं प्रसिद्धमित्याह-सतामिति। सत्पुरुषाणां सहजास्थितिनाम्ना प्रसिद्धमित्यर्थः । ननु वाङ्नियमनमेव प्रसिद्धं मौनमिति चेदत आह-अर्द्धेन-गिरेति ॥ १०९ ॥

जिसको वाणी नहीं प्राप्त होय उसकी वर्णना कौन कर सके है अर्थात् कोई नहीं । यदि प्रपञ्चकी वर्णना करी जाय तौ यह भी शब्दरहित है अर्थात् प्रपञ्चमें भी सत् असत् नाना प्रकारके पदार्थ मालूम होय हैं इस कारण प्रपंचका भी वर्णन नहीं होसके है । इसकोभी मौन कहे हैं, यह मौन साधुपुरुषोंको स्वभावसिद्ध होय है । ब्रह्मवादी लोग बालकके मौनको मौन कहे हैं ॥ १०८ ॥ १०९ ॥

देशका निरूपण ।

आदावंते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥११०॥

इदानीं देशं लक्षयति-आदाविति । अत्र जनस्य त्रैकालिकाभाव आनुभविकः स्वप्रतीत्या ज्ञेयः, नतु लौकिकशास्त्रीयप्रतीतिभ्याम् । विरोधादिति भावः । स्पष्टमन्यत् ॥ ११० ॥

जहां आदि, अन्त, मध्यमें कहीं भी जन न होय जिस करके निरन्तर संसार व्याप्त रहै उस देशका नाम निर्जन देश है, सदा जनशून्य स्थान ही योगसाधनके अर्थ उपयुक्त होय है ॥ ११० ॥

कालका लक्षण ।

कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः ॥ १११ ॥

अथ कालं लक्षयति-कलनादिति । निमेषत आरभ्य कलनात्सर्गस्थितिप्रलयाधारत्वादित्यर्थः । शेषं स्पष्टम् ॥ १११ ॥

इदानीमेतेषां प्रत्येकं निर्देशक्रमेण स्वाभिमतानि लक्षणान्याह—सर्वमित्याद्येकविंशत्या । तत्र प्रथमोद्दिष्टं यमं तावद्दर्शयति—सर्वमिति । सर्वमाकाशादि देहांतं जगद्ब्रह्म, बाधसामानाधिकरण्यद्वारा स्थाणुपुरुषादिवदित्यर्थः । इति विज्ञानान्निश्चयाद्धेतोरिंद्रियाणां श्रोत्रादीनामेकादशकरणानां ग्रामः समूहस्तस्य संयमः सम्यक् शब्दादिविषयाणां विनाशित्वसातिशयत्वदुःखदत्वादिदोषदर्शनात् यमो विषयेभ्यो निवारणम् अयं यम इति संप्रोक्तः,नतु केवलमहिंसादिरित्यर्थः । ततश्च किमत आह-अभ्यसनीय इति । अयं मुहुर्मुहुरभ्यसनीय इति॥ १०४॥

सम्पूर्ण जगत् ब्रह्म है इस प्रकार निश्चय करके सम्पूर्ण इन्द्रियोंका निग्रह करना है सो 'यम' कहावे है, इसका अभ्यास पुरुषको वारंवार करना योग्य है ॥ १०४ ॥

नियमका निरूपण ।

सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।
नियमो हि परानंदो नियमात्क्रियते बुधैः ॥ १०५ ॥

एवं यमं लक्षयित्वा नियमं लक्षयति—सजातीयेति । सजातीयं प्रत्यगभिन्नं परं ब्रह्म, तदेकाकारा वृत्तिः प्रवाहः सजातीयप्रवाहः । यद्वा सजातीयानामसंगोऽहमविक्रियोऽहमित्यादिप्रत्यगभिन्नब्रह्मप्रत्ययानां प्रवाहः । च पुनः—विजातीयतिरस्कृतिः। विजातीयं ब्रह्मात्मविलक्षणम्, जगत्पूर्वसंस्काराज्जायमाना तदाकारा वृत्तिरित्यर्थः । तस्य तिरस्कृतिर्दोषस्मृत्याऽधिकोपेक्षाऽनादर इत्यर्थः।अयं नियम उक्तः। नतु केवलं शौचादिरित्यर्थः।

हीत्युपनिषत्प्रसिद्धौ । नन्वनयोरुपनिषत्प्रसिद्ध्या कः पुरुषार्थ इति चेदत आह—**परानंद** इति । ततश्च किमत आह—**नियमादित्यादि** । सुगमम् ॥ १०५॥

सजातीय प्रवाह अर्थात् मैं ब्रह्म हूं इस प्रकार ज्ञानका प्रवाह और विजातीयतिरस्कृति अर्थात् ब्रह्मसे अतिरिक्त सम्पूर्ण संसार मिथ्या है इस प्रकार ज्ञानको नियम कहै हैं ॥ १०५ ॥

त्यागका निरूपण ।

त्यागः प्रपंचरूपस्य चिदात्मत्वावलोकनात् ।
त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः॥१०६॥

इदानीं तृतीयं त्यागं लक्षयति—**त्याग** इति । **प्रपंचरूपस्य** प्रपंचो नामरूपलक्षणः । रूप्यते घटोऽयं पटोऽयम् इत्यादि नामरूपतो निरूप्यते व्यवह्रियते प्रकाश्यते येन तत्प्रंपचरूपं सर्वाधिष्ठानभूतं पदार्थस्फुरणं तस्य । **चिदात्मत्वावलोकनाच्चि**-दजडं स्वत एव प्रकाशमानं ब्रह्म, तदात्मस्वरूपं यस्य तद्भाव-स्तस्यावलोकनमनुसंधानं तस्माद्धेतोर्यस्त्यागः नामरूपोपेक्षा स एव त्यागस्त्यागशब्दवाच्यः, "ईशावास्यमिदं सर्वम्" इत्यादि-श्रुतेः । हीति विद्वदनुभवप्रसिद्धौ । नन्वयं त्यागो न कुत्रापि प्रसिद्ध इत्याशंक्याह—**महतां पूज्य** इति। तत्र हेतुः **सद्य** इति। यतोऽयं त्यागः सद्योऽनुसंधानकाल एव मोक्षमयः परमानंद-स्वरूपावस्थानरूपः, अत एवात्मतत्त्वविदामिष्टत्वादतिप्रसिद्धोऽयं त्याग इत्यर्थः । तस्मादयमेवं मुमुक्षुणा कर्तव्यो नान्यः । केव-लस्वकर्माद्यकरणरूप इति भावः । एवमग्रेऽप्यूह्यम् ॥१०६॥

चैतन्यस्वरूप तत्त्वको अवलोकन करके जो प्रपञ्चका अर्थात् घट पटादि नामसे व्यवहृत पदार्थोंका त्याग करना है सो त्याग कहावै

है इसका महात्मा लोग बडा आदर करे हैं जिस कारण यह शीघ्रही मोक्षको देय है ॥ १०६ ॥

मौनका निरूपण ।

यस्माद्वाचो निवर्तंते अप्राप्य मनसा सह ।
यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १०७ ॥

अथ मौनं लक्षयति–यस्मादिति । शब्दप्रवृत्तिनिमित्तजातिक्रियादेरभावात् मनोवाचामगोचरं यन्मौनं वक्तुमशक्यं यद्ब्रह्म तथापि योगिभिर्गम्यं ज्ञानयोगिभिः प्रत्यगभिन्नत्वेन प्राप्यं तत्प्रसिद्धमेव ब्रह्मरूपं मौनं सर्वदा बुधो विवेकी भवेत् । तदहमस्मीत्यनुसंदध्यादित्यर्थः ॥ १०७ ॥

जिसको वाणी और मन नहीं प्राप्त होसके हैं और योगी लोकोंको लब्ध होय है ऐसे परब्रह्मका ही नाम मौन है, पण्डित जन तिस ब्रह्मका 'मैं ब्रह्म हूं' इस प्रकार अनुसन्धान करै ॥ १०७ ॥

वाचो यस्मान्निवर्त्तंते तद्वक्तुं केन शक्यते ।
प्रपंचो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥१०८॥
इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।
गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥ १०९ ॥

नन्विदं प्रत्यगभिन्नब्रह्मानुसंधानं ध्यानरूपं चतुर्दशमंगं प्रतीयते इत्याशंक्य स्वारस्यात्प्रकारान्तरेण मौनमेव लक्षयति सार्द्धेन–वाच इति । अयं भावः-शब्दप्रवृत्तिनिमित्ताभावाद्ब्रह्म यथा वागविषयं तथा नामरूपजात्यादिप्रपंचोऽपि सदसदादिविकल्पासहत्वाद्वागतीतः ॥१०८॥ इतीति । इत्युक्तप्रकारेण ब्रह्मजगतोर्विवा-

दत्यागरूपंवा तन्मौनं भवेत् । केषामित्याकांक्षायां सतां चेदं प्रसिद्धमित्याह-सतामिति। सत्पुरुषाणां सहजास्थितिनाम्ना प्रसिद्धमित्यर्थः । ननु वाङ्नियमनमेव प्रसिद्धं मौनमिति चेदत आह-अर्द्धेन-गिरेति ॥ १०९ ॥

जिसको वाणी नहीं प्राप्त होय उसकी वर्णना कौन कर सके है अर्थात् कोई नहीं । यादि प्रपञ्चकी वर्णना करी जाय तौ यह भी शब्दरहित है अर्थात् प्रपञ्चमें भी सत् असत् नाना प्रकारके पदार्थ मालूम होय हैं इस कारण प्रपंचका भी वर्णन नहीं होसके है । इसको भी मौन कहे हैं, यह मौन साधुपुरुषोंको स्वभावसिद्ध होय है । ब्रह्मवादी लोग बालकके मौनको मौन कहै हैं ॥ १०८ ॥ १०९ ॥

देशका निरूपण ।

आदावंते च मध्ये च जनो यस्मिन्न विद्यते ।
येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥११०॥

इदानीं देशं लक्षयति-आदाविति । अत्र जनस्य त्रैकालिकाभाव आनुभविकः स्वप्रतीत्या ज्ञेयः, नतु लौकिकशास्त्रीयप्रतीतिभ्याम् । विरोधादिति भावः । स्पष्टमन्यत् ॥ ११० ॥

जहां आदि, अन्त, मध्यमें कहीं भी जन न होय जिस करके निरन्तर संसार व्याप्त रहै उस देशका नाम निर्जन देश है, सदा जनशून्य स्थान ही योगसाधनके अर्थ उपयुक्त होय है ॥ ११० ॥

कालका लक्षण ।

कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।
कालशब्देन निर्दिष्टो ह्यखंडानंद अद्वयः ॥ १११ ॥

अथ कालं लक्षयति-कलनादिति । निमेषत आरभ्य कलनात्सर्गस्थितिप्रलयाधारत्वादित्यर्थः । शेषं स्पष्टम् ॥ १११ ॥

जिसके निमेषमात्रमें ब्रह्मादि सर्वभूतोंका कलन (सृष्टि, स्थिति, प्रलय,) होय है इस कारण अखण्ड आनन्दस्वरूप अद्वय ब्रह्म ही काल शब्द करके कहा जाय है ॥ १११ ॥

आसनका निरूपण ।

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिंतनम् ।
आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥११२॥

आसनं लक्षयति–सुखेनैवेति । यस्मिन्सुखे सुखरूपे ब्रह्मणि चिंतनं कर्त्तव्याकर्त्तव्यचिंता नैव भवेत् तद्ब्रह्मासनं विजानीयादित्यन्वयः । कीदृशं ब्रह्म ? अजस्रं कालत्रयावस्थायीत्यर्थः । सुगममन्यत् ॥ ११२ ॥

जिसमें सदा भलीप्रकार सुखसे ब्रह्म विचार होय उसको आसन कहे हैं उससे अतिरिक्तमें ब्रह्म विचार नहीं होय है, इस कारण आसनसे अन्य सुखकारक नहीं होय है, किन्तु सुख नाश होय है । सो आसन पद्म स्वस्तिकादिक जानना ॥ ११२ ॥

सिद्धासनका लक्षण ।

सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् ।
यस्मिन् सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ११३

प्रसंगादासनविशेषं लक्षयति–सिद्धमिति । सिद्धं च तदासनं च । अथवा सिद्धानामासनं सिद्धासनमिति । कर्मधारयतत्पुरुषसमासाभ्यां ब्रह्मैवेत्यर्थः ॥ ११३ ॥

जिससे सिद्धपुरुष सिद्ध कहलावे हैं और जिसमें सिद्ध लीन रहै हैं और जो विश्वका अधिष्ठान स्वरूप अव्यय है वह सिद्धासन कहावे है ॥ ११३ ॥

मूलबन्धका निरूपण ।

यन्मूलं सर्वभूतानां यन्मूलं चित्तबंधनम् ।
मूलबंधः सदा सेव्यो योग्योऽसौ राजयोगिनाम् ११४

अथ मूलबंधं लक्षयति–यन्मूलमिति । आकाशादिसर्वभूतानां यन्मूलमादिकारणं ब्रह्म तथा चित्तबंधनं चित्तस्य बंधकारणं मूलाऽज्ञानं तदपि यन्मूलं यदाश्रयं पृथक्सत्ताशून्यत्वादिति । यद्वा चित्तस्य बंधनमेकत्र लक्ष्ये निग्रहस्तदपि यन्मूलं यस्य ब्रह्मणः प्राप्तिनिमित्तमित्यर्थः । स मूलबंध इत्यन्वयः। राजयोगिनां व्यवहारेऽप्यविक्षिप्तचित्ततालक्षणो राजयोगस्तद्वतां ज्ञानपरिपाकयुक्तानामित्यर्थः । शेषं स्पष्टम् ॥ ११४ ॥

आकाशादिपञ्चभूतोंका आदि कारण और जो चित्तकाश्रयका मूल है सो मूलबन्ध कहावे है । यह मूलबन्ध राजयोगियोंको सदा सेवन करना योग्य है ॥ ११४ ॥

देहसाम्यका निरूपण ।

अंगानां समतां विद्यात्समे ब्रह्मणि लीयते ।
नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥

इदानीं देहसाम्यं लक्षयति-अंगानामिति । अंगानां ब्रह्मण्यध्यस्तानां स्वभावविषयाणामधिष्ठानसमत्वदृष्ट्या समतां विद्याज्जानीयात् चेत्समे ब्रह्मणि । अंगवैषम्यमित्यत्राध्याहारः । तच्चेन्नो लीयते समब्रह्मरूपतया न तिष्ठतीत्यर्थः । तर्हीत्यत्रशेषः । शुष्कवृक्षवदंगानामृजुत्वं सरलत्वमचंचलत्वं च यत्तत्समानत्वं नैव भवेदिति संबंधः । अंगानां विषमस्वभावत्वादिति भावः ॥ ११५ ॥

सब प्राणियोंमें समदृष्टि करके जो समान ब्रह्ममें लीन होय है सो देहसाम्य कहावे है । सूखे हुए काष्ठकी तरह समान वस्तुको समता नहीं कहै हैं ॥ ११५ ॥

दृक्स्थितिका निरूपण ।

दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् ।
सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥

इदानीं दृक्स्थितिं लक्षयति—दृष्टिमिति । ब्रह्मणि फलव्याप्यत्वाभावेऽपि वृत्तिव्याप्यत्वात् दृष्टिमंतःकरणवृत्तिं ज्ञानमयीमखंडब्रह्माकारां कृत्वा जगत्सर्वं ब्रह्ममयं पश्येत् । ब्रह्मैवेदं सर्वमित्येतावन्मात्रैव वृत्तिः कार्येति भावः । स्पष्टमन्यत् ॥ ११६ ॥

दृष्टिको ज्ञानमय करके उस दृष्टिके द्वारा ब्रह्ममय जो जगत्को देखना है यही दृष्टि परम उदार मङ्गलकी देनेवाली है, नासाके अग्रभागमें देखनेको दृष्टि नहीं कहै हैं ॥ ११६ ॥

दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥

ननु तथापि ब्रह्मणि वृत्तिप्रवृत्तिनिमित्तजात्याद्यभावादिंद्रियादिप्रत्यक्षविषयस्य जगतो ब्रह्मरूपत्वेन दर्शनं कथं स्यादित्याशंक्य स्वारस्यात्पक्षान्तरेणाह—दृष्टीति । वाशब्दः पक्षांतरे । दृष्टीत्यादि श्रोत्रादिसर्वत्रिपुटीनामुपलक्षणम् । यत्र यस्मिन् ब्रह्मस्वरूपे दृष्ट्यादिसर्वत्रिपुटीनां विरामो लयो भवेत्तत्र तस्मिन्नेव प्रपंचातीते दृष्टिरंतःकरणवृत्तिः कर्तव्या, न नासिकाग्रावलोकिनीत्यर्थः ॥ ११७ ॥

और जिसमें दृष्टि, दर्शन एवं दृश्यका विराम होय है उसको भी दृष्टि कहै हैं । वही दृष्टि करना योग्य है, नासाके अग्रभागमें देखना मात्र रूप जो दृष्टि है सो योग्य नहीं है ॥ ११७ ॥

प्राणायामका सामान्य लक्षण ।

चित्तादिसर्वभावेषु ब्रह्मत्वे सर्वभावनात् ।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥

अथ प्राणायामं लक्षयति—चित्तादीति । मनोऽधीनत्वा-

त्माणस्य मनोनिरोधेनैव प्राणनिरोधः, नतु प्राणनिरोधेनैव पातंजलाभिमतेन मनोनिरोधस्तदधीनत्वाभावादिति फलितार्थः ॥ ११८ ॥

चित्तको आदि ले सब प्रकारके पदार्थोंमें ब्रह्म भावना कर सब प्रकारकी इन्द्रियोंकी वृत्तियोंका जो रोकना है सो प्राणायाम कहावे है॥११८॥

रेचक और पूरक प्राणायाम ।

निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥

अमुं प्राणायामं स्वाभिमतेन रेचकादिविभागत्रयेण लक्षयति सार्द्धेन-निषेधनमिति । स्पष्टम् ॥ ११९ ॥

प्रपञ्चका निषेध अर्थात् मिथ्यात्वको 'रेचक' नाम प्राणायाम कहे हैं। एक ब्रह्म ही सर्व रूप है ऐसी जो वृत्ति है सो 'पूरक' नाम प्राणायाम कहावै है ॥ ११९ ॥

कुम्भक प्राणायाम ।

ततस्तद्वृत्तिनैश्चल्यं कुंभकः प्राणसंयमः ।
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥१२०॥

तत इति । अनात्मोपेक्षाऽऽत्मानुसंधानतद्दाढर्यानि रेचकादिशब्दवाच्यानीति भावार्थः। नन्वयं त्रिविधोऽपि प्राणायामो न कुत्रापि श्रुत इत्यपेक्षायामत्राधिकारिणमाहार्द्धेन-अयमिति। अयमुक्तलक्षलः प्राणायामः । चकाराद्वेदनययुक्त इत्यर्थः । प्रबुद्धानां प्रकर्षेणासंभावनादिरहितत्वेन बुद्धानामात्मबोधयुक्तानाम् । निःसंदेहाऽपरोक्षज्ञानिनामित्यर्थः । योग्य इत्यध्याहारः । तर्ह्यज्ञानां कीदृश इत्यत आह-अज्ञानामिति ॥ १२० ॥

अनन्तर निश्चलतासे एक ब्रह्म ही स्वरूप है ऐसा जो निश्चय होता है सो 'कुम्भक' प्राणायाम कहावे है । इस प्रकार रेचक, पूरक और

कुम्भक, ज्ञानियोंके प्राणायाम होय हैं । अज्ञानी पुरुष वायु रोककर नासिकाको पीडा देनेको प्राणायाम कहै हैं ॥ १२० ॥

प्रत्याहारका लक्षण ।

विषयेष्वात्मतां दृष्ट्वा मनसश्चितिमज्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥१२१॥

इदानीं प्रत्याहारं लक्षयति—विषयेष्विति । विषयेषु घटादिषु । यद्वा शब्दादिषु अन्वयव्यतिरेकाभ्यामात्मतां सत्तास्फुरत्ताप्रियतामात्रतां दृष्ट्वानुसंधाय मनसोऽन्तःकरणस्य चितिमज्जनं नामरूपक्रियानुसंधानराहित्येन चित्स्वरूपतयावस्थानं स प्रत्याहारः । ततः किमत आह—अभ्यसनीय इति ॥ १२१ ॥

विषयोंके विषे आत्मत्वको देखकर अर्थात् सर्व जगत्को ब्रह्ममय देखकर और चैतन्यस्वरूप आत्मामें चित्तको जो लगाना है सो प्रत्याहार कहावे है । मोक्षकी इच्छा करनेवाले पुरुषोंको यह प्रत्याहार अवश्य अभ्यास करने योग्य है ॥ १२१ ॥

धारणाका लक्षण ।

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।
मनसो धारणं चैव धारणा सा परा मता ॥ १२२॥

धारणां लक्षयति—यत्रेति । यत्र यत्र यस्मिन् यस्मिन् पदार्थे मनो याति गच्छति तत्र तत्र ब्रह्मणः सत्तादिमात्रस्य नामाद्युपेक्षया दर्शनादनुसंधानान्मनसो धारणं ब्रह्मण्येव स्थिरीकरणं धारणेत्यन्वयः । नन्वाधारादिषट्चक्रमध्ये एकत्र मनसो धारणं 'धारणा' इति प्रसिद्धमत आह—सेति । साऽत्रोक्तलक्षणा धारणा परोत्कृष्टा मता । तत्त्वबोधवतामिति शेषः । अन्या तु

पातंजलाभिमता प्राणायामादिवदपरेति भावः । च-एवेत्यव्ययद्वयं वेदांतविद्वदनुभवप्रसिद्धिं द्योतयति ॥ १२२ ॥

जहां जहां मन जाय तहां तहां ब्रह्मस्वरूप दर्शन पूर्वक जो मनको निश्चल करना है सो सबसे उत्कृष्ट धारणा कहावे है ॥ १२२ ॥

ध्यानका लक्षण ।

ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया स्थितिः ।
ध्यानशब्देन विख्याता परमानंददायिनी ॥ १२३ ॥

अथात्मध्यानं लक्षयति-ब्रह्मैवेति । सद्वृत्त्या सती प्रमाणांतरबाधायोग्या वृत्तिस्तया वृत्त्या निरालंबतया देहाद्यनुसंधानराहित्येन स्थितिः, अवस्थानमित्यर्थः । शेषं स्पष्टम् ॥१२३॥

सम्पूर्ण बाधाओंको दूरकर देहानुसन्धान परित्यागपूर्वक सम्पूर्ण ब्रह्ममय है इस प्रकार ज्ञान करके जो ब्रह्मस्वरूप अवलम्बन कर स्थिति करना है उसको आत्मध्यान कहे हैं, इसके होनेसे परम आनंद प्राप्त होय है ॥ १२३ ॥

समाधिका लक्षण ।

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४ ॥

अथान्यत्समाधिरूपं पंचदशमंगं लक्षयति-निर्विकारतयेति । निर्विकारतया विषमानुसंधानरहिततयांतः करणवृत्त्या, पुनरनंतरमेव ब्रह्माकारतया यत् सम्यक्प्रपंचसंस्काररहितं ध्यातृध्येयाकारवृत्तिशून्यं वृत्तिविस्मरणं द्वैताननुसंधानं स समाधिः । पंचदशमंगमित्यर्थः । ननु वृत्तिविस्मरणस्याज्ञानरूपत्वात्कथं समाधित्वमित्याशंक्य ब्रह्मात्मैक्यबोधाभावे केवलवृत्तिविस्मरणस्य तथात्वेऽपि न ब्रह्मज्ञानसहितस्य तथात्वमित्याशयेन समाधिं विशिनष्टि-ज्ञानसंज्ञक इति । ज्ञानमिति संज्ञा यस्य स

ज्ञानसंज्ञकः । ब्रह्माकारतया स्फुरणरूप इत्यर्थः । उक्तं च– "समाधिः संविदुत्पत्तिः परजीवैकतां प्रति" इति ॥ १२४ ॥

निर्विकार चित्त होकर अपनेको ब्रह्मस्वरूप जान करके सम्पूर्ण प्रकारके प्रपञ्च भावको परित्याग करना ज्ञानयोंकी समाधि कहावै है ॥ १२४ ॥

निदिध्यासनकी अवधि ।

इमं चाकृत्रिमानंदं तावत्साधु समभ्यसेत् ।
वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सन्भवेत्स्वयम् ॥ १२५ ॥

इदानीं यदर्थं सांगमिदं निदिध्यासनमुक्तं तदाह–इममिति । अकृत्रिमानंदं स्वरूपभूतानंदाभिव्यंजकं निदिध्यासनमित्यर्थः । चकाराद्यथाबुद्धि वेदांतविचारमपीति । स्पष्टमन्यत् ॥ १२५ ॥

जबतक पूर्व कहे हुए आनन्दमय ब्रह्मके वशमें नहीं होय तबतक अकृत्रिम आनन्द (निदिध्यासन) उत्तम प्रकारसे अभ्यास करे, परन्तु जिस समय निदिध्यासनादि द्वारा स्वयं ब्रह्मस्वरूप होजाय उस समय निदिध्यासनादिकका कोई प्रयोजन नहीं ॥ १२५ ॥

निदिध्यासनका फल ।

ततः साधननिर्मुक्तः सिद्धो भवति योगिराट् ।
यत्स्वरूपं न चैतस्य विषयो मनसो गिराम् ॥ १२६ ॥

एवमभ्यसतः फलमाह–तत इति । साधननिर्मुक्तः साधनाभ्यासरहित इत्यर्थः । एतस्य योगिनः तद्वेदांतप्रसिद्धं स्वरूपं ब्रह्मैवेति भावः ॥ १२६ ॥

पूर्व कहे हुए योगाभ्यास करनेसे पुरुष सिद्ध होय है, सम्पूर्ण प्रकारके साधनोंसे छूट जाय है और योगियोंका राजा होय है । उस ब्रह्माका स्वरूप योगियोंके मन वाणीका भी विषय नहीं है ॥ १२६ ॥

समाधिमें विघ्न ।

समाधौ क्रियमाणे तु विघ्ना आयांति वै बलात् ।
अनुसंधानराहित्यमालस्यं भोगलालसम् ॥ १२७ ॥

लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता ।
एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः ॥१२८॥

अखंडैकरसब्रह्मस्वरूपत्वेनावस्थानलक्षणमोक्षफलदोऽयं समाधिपर्यंतो योगो गुर्वनुग्रहवतां सुकरोऽस्ति तथापि सुकर इत्यनादरो न कार्यः, विघ्नबाहुल्यसंभवादित्याहद्वाभ्यां—समाधाविति । स्पष्टोऽर्थः ॥ १२७ ॥ लय इति । तत्र लयो निद्रा । तमः कार्याकार्याऽविवेकः । विक्षेपो विषयस्फुरणम् । रसास्वादो धन्योऽहमित्याद्यानदाकारा वृत्तिः। च पुनः शून्यता चित्तदोषः, रागद्वेषादितीव्रवासनया चित्तस्य स्तब्धीभावः कषायः । क्षुब्धतेत्यर्थः । स्पष्टमन्यत् ॥ १२८ ॥

समाधि साधन कालमें अनेक प्रकारके विघ्न आयके बलसे निरोध करै हैं, वह विघ्न यह हैं—अनुसन्धानराहित्य अर्थात् किसीप्रकार अनुसंधान नहीं रहना, आलस, भोगलालसा, लय अर्थात् निद्रा, तम अर्थात् कार्य्याकार्यका अविवेक, विक्षेप अर्थात् विषयानुराग, रसास्वाद अर्थात् मैं बडा धन्य हूँ इस प्रकार आनन्दका अनुभव करना, शून्यता अर्थात् रागद्वेषादिकसे चित्तकी विकलता, इस प्रकार विघ्नोंके समूहको ब्रह्मवेत्ताओंको शनैःशनैः त्याग करना योग्य है ॥ १२७ ॥ १२८ ॥

बन्ध—मोक्षमें वृत्तिकी कारणता ।

भाववृत्त्या हि भावत्वं शून्यवृत्त्या हि शून्यता ।
ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत् ॥ १२९ ॥

वृत्तिरेव बंधमोक्षकारणमित्याह—भावेति । भाववृत्त्या घटाद्याकारवृत्त्या भावत्वं तन्मयत्वम् । भवतीति शेषः । शून्यवृत्त्या अभाववृत्त्या । शून्यता जडतेत्यर्थः । हीति लोकप्रसिद्धौ । तथा ब्रह्माकारवृत्त्या पूर्णत्वम्। हीति विद्वत्प्रसिद्धौ । ततः किमत आह—पूर्णत्वमिति ॥ १२९ ॥

जिसके चित्तकी वृत्ति घटादि भाव पदार्थोंमें जाय है उसको घटादि पदार्थोंका प्रकाश होय है, जिसके चित्तकी वृत्ति शून्यताको आश्रय करे है उसका चित्त शून्यमय होय है। इसी प्रकार जिसके चित्तकी वृत्ति चैतन्यस्वरूप ब्रह्ममें जाय है उसको पूर्ण ब्रह्मका लाभ होय है। इससे पुरुषको जिसप्रकार पूर्ण ब्रह्मत्वका लाभ होय उसतरहका अभ्यास कर लाभ उठाना योग्य है ॥ १२९ ॥

अब्रह्मवृत्तिवालेकी निन्दा ।

ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।
ते तु वृथैव जीवंति पशुभिश्च समा नराः ॥ १३० ॥

इदानीं ब्रह्ममयीं वृत्तिं स्तोतुं तद्वृत्तित्यागपरान्निंदति—ये हीति । ये एनां ब्रह्माख्यां वृत्तिं जहति त्यजंति ते तु वृथैव जीवंतीत्यन्वयः । स्पष्टमन्यत् ॥ १३० ॥

जो पुरुष परमपवित्र और सबसे उत्कृष्ट ब्रह्मवृत्तिका परित्याग करे हैं वे मनुष्य इस संसारमें वृथा ही पशुओंके समान जीवन धारण करे हैं ॥ १३० ॥

ब्रह्मवृत्तिवालेकी प्रशंसा ।

ये हि वृत्तिं विजानंति ज्ञात्वापि वर्धयंति ये ।
ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये ॥ १३१ ॥

संप्रति तामेव वृत्तिं विवर्द्धयितुं ब्रह्मवृत्तिपरान्सत्पुरुषान् स्तौति—ये हीति । स्पष्टम् ॥ १३१ ॥

जो ब्रह्मवृत्तिको जानते हैं और जानकर बढावै हैं वह सत्पुरुष धन्य और तीनों भुवनमें पूजनीय होय हैं ॥ १३१ ॥

ब्रह्मवृत्तिवालेकी मुक्ति ।

येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ।
ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ १३२ ॥

एवं ब्रह्मवृत्तिपरान्स्तुत्वाऽधुना तेषां ब्रह्मप्राप्तिरूपं फलमाह-येषामिति । सुगमम् ॥ १३२ ॥

जिन पुरुषोंकी ब्रह्मवृत्ति अत्यन्त वृद्धिको प्राप्त होय है और भलीप्रकार पक जाय है उनको ही सर्व स्वरूप ब्रह्मका लाभ होय है और जो केवल जिह्वाहीसे अहं ब्रह्म कहै हैं उनको ब्रह्मका लाभ किसी समय भी नहीं होय है ॥ १३२ ॥

केवल शब्दवादियोंकी निंदा ।

कुशला ब्रह्मवार्त्तायां वृत्तिहीनाः सुरागिणः ।
तेऽप्यज्ञानितया नूनं पुनरायांति यांति च ॥ १३३ ॥

तानेव शब्दवादिनो निंदति-कुशला इति।स्पष्टम्॥१३३॥

जो पुरुष ब्रह्मवृत्ति करके हीन होय है और ब्रह्मवेत्तापन प्रकाश करै हैं इसी प्रकार ब्रह्ममय दिखावें हैं वह अज्ञान वश वारंवार संसारमें आवागमन करै हैं ॥ १३३ ॥

ब्रह्मनिष्ठोंकी वृत्ति ।

निमेषार्धं न तिष्ठंति वृत्तिं ब्रह्ममयीं विना ।
यथा तिष्ठंति ब्रह्माद्याः सनकाद्याः शुकादयः ॥१३४॥

यत एवं तस्माद्ब्रह्मनिष्ठैर्ब्रह्मवृत्त्यैव सर्वदा स्थातव्यमिति सूचयितुं ब्रह्मादीनामुदाहरणमाह-निमेषेति। यथा ब्रह्माद्यास्तथा सनकाद्याः, यथा सनकाद्यास्तथा शुकाद्या इति संप्रदायो दर्शितः। एतेन ब्रह्मादिसेव्यत्वादिति श्रेष्ठोऽयं समाधिपर्यंतो राजयोगः सर्वदा मुमुक्षुभिः सेवनीय इति ध्वनितम् ॥ १३४ ॥

जिस प्रकार ब्रह्मादि देवगण सनकादि मुनिगण शुकादि ब्रह्मपरायण गण सर्वकालमें ब्रह्ममें लीन रहै हैं तिसी प्रकार मोक्षकी इच्छा करनेवाले पुरुष ब्रह्ममयी वृत्तिके विना अर्थात् ब्रह्मानुसन्धानके विना पलभर भी नहीं खोवे हैं अर्थात् सदा ब्रह्मवृत्तिमें तत्पर रहै हैं ॥१३४॥

वेदान्तसिद्धान्तका निरूपण ।

कार्ये कारणतायाता कारणे नहि कार्यता ।
कारणत्वं ततो गच्छेत्कार्याभावे विचारतः ॥ १३५ ॥

तदेवं स्वाभिमतं सांगं राजयोगमभिधाय पूर्वोपक्रांतं सांख्यापरपर्यायं वेदांतविचारमुपसंहरति—कार्ये इत्यादिपंचभिः श्लोकैः । कार्ये घटपटादिरूपे विकारे कारणता मृत्तत्वादिरूपा सर्वविकाराधिष्ठानता आयाताऽनुगता, कारणे तु कार्यता नहीति प्रसिद्धम् । ततः कारणात्कार्याभावे कारणत्वं गच्छेत् । ननु कथं कारणे कार्याभाव इत्यत आह—विचारत इति । यथायं दृष्टांतस्तथाकाशादिकार्ये कारणता । आकाशोऽस्तिभातीत्यादिव्यवहारहेतुभूता सत्यज्ञानादिरूपब्रह्मणः कारणता आयाता अनुगता, कारणे ब्रह्मणि तु आकाशादिकार्यता नहीति । अतः परमार्थतः आकाशाद्यभावे ब्रह्मणः कारणतापि नहीति दार्ष्टांतिकोऽर्थः ॥ १३५ ॥

कार्य्यमें कारणता रहे है परन्तु कारणमें कार्य्यता नहीं मालूम होय है, कार्य्यका भाव होनेसे कारणता अपने आप सिद्ध हो जाय है । इसी प्रकार विचार करनेसे आकाशादि कार्य सम्पूर्ण अनित्य मालूम होय हैं और केवल ब्रह्म ही कारणस्वरूप सत्य मालूम होय है ॥१३५॥

अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।
द्रष्टव्यं मृद्घटेनैव दृष्टांतेन पुनः पुनः ॥ १३६ ॥

ततः किमत आह—अथेति । अथानंतरं कार्यकारणभावनिवृत्तौ यच्छुद्धं मनोवाचामगोचरं वस्तु तद्भवेत् । "यतो वाचो निवर्त्तंते" इत्यादिश्रुतिप्रसिद्धिद्योतनार्थो हिशब्दः । ननु बुद्धेः

क्षणिकत्वेनैकदा तथा विचारितेऽपि पुनरन्यथैव भातीत्यत आह-द्रष्टव्यमिति ॥ १३६ ॥

जब कार्य कारणभाव निवृत्त होय है तब शुद्ध मन और वाणीसें अगोचर जो ब्रह्मवस्तु है सोई रहै है, जैसे घटके नाश होनेपर मृत्तिका ही बाकी रहे है ऐसा ही बारम्बार समझना ॥ १३६ ॥

अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।
उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥१३७॥

न केवलमयं विचारो ज्ञानसाधनमेवापितु ध्यानसाधनमपीत्याह-अनेनेति । अनेनैव प्रकारेण शुद्धचित्तानां वृत्तिज्ञानम् उदेति, ततः परं ब्रह्मात्मिका वृत्तिर्भवेदिति योजना। पदानामर्थस्तु स्फुट एव ॥ १३७ ॥

इस प्रकार ब्रह्मात्मिका वृत्ति होय है, तदनन्तर शुद्ध चित्त होनेसे वृत्तिके ज्ञानका उदय होय है ॥ १३७ ॥

कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।
अन्वयेन पुनस्तद्धि कार्ये नित्यं प्रपश्यति ॥ १३८ ॥

तमेव विचारं विशदयति द्वाभ्याम्-कारणमिति । आदौ प्रथमं कारणं व्यतिरेकेण कार्यविरहेण विचारयेत् । पुनस्तत् कारणमन्वयेनानुवृत्त्या कार्येऽपि नित्यं प्रपश्यतीति ॥१३८॥

मुमुक्षु पुरुष पहले कारणके विना कार्य्यकी उत्पत्ति नहीं होय इससे व्यतिरेकानुमानसे कारणका निश्चय करै (यथाहि-कार्य्यं सकारणकम्) ऐसे अनुमानमें (यदि कारणं न स्यात् तर्हि कार्य्यमपि न स्यात् कार्य्यं दृश्यते अतः कारणमप्यनुमीयते) यदि कारण नहीं होय तौ कार्य्य भी नहीं होय, कार्य्य है इस कारण कारणका अनुमान किया जाय है। इस प्रकार व्यतिरेकानुमान होय है ॥ १३८ ॥

कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् ।
कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः ॥ १३९ ॥

अथवैवं विचारयेदित्याह—कार्येति । आदौ कार्ये कारणमेव विचारयेत्, पश्चात्तत्कार्यं विसर्जयेत् नानुसंदध्यात् । एवं कार्यवर्जने सति कारणत्वं स्वत एव गच्छेत् । एवं कार्यकारणवर्जनेऽवशिष्टं सच्चिन्मात्रं मुनिर्मननशीलः स्वयमेव भवेदिति ॥ १३९ ॥

पहले कार्य्यसे कारणका निश्चय करै, पीछे कार्य्यका त्याग कर देय, कार्य्यका त्याग करनेपर कारण आप ही अवशिष्ट रह जाय है। इसी प्रकार कार्य्यके वर्जित होनेसे मुनिगण स्वयं चिन्मय स्वरूप हो जाय हैं ॥ १३९ ॥

ब्रह्मभावनासे ब्रह्मत्व ।

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना ।
पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥ १४० ॥

ननु विचारजन्यापरोक्षज्ञानेन मुनेर्ब्रह्मत्वं भवतु नाम, परन्तु परोक्षज्ञानिनः कथं भवेदित्याशंक्य तीव्रभावनया परोक्षज्ञानिनोऽपि ब्रह्मत्वं भवेदिति सदृष्टांतमाह—भावितमिति । अयं भावः—यद्यपि परोक्षज्ञानेन प्रमातृगतावरणनिवृत्तौ सत्यामपि प्रमेयगतमावरणं न निवर्त्तते तथापि निश्चयात्मना निश्चययुक्तबुद्धिमता पुरुषेण यद्वस्तु सच्चिदानंदं ब्रह्म तीव्रवेगेनाऽहर्निशं ब्रह्माकारवृत्त्या भावितं चिंतितं तद्वस्तु ज्ञेयमपरोक्षेण ज्ञातुं योग्यं ब्रह्म शीघ्रमचिरेण पुमान् भवेत्। प्रत्यगभिन्नब्रह्मभावनया पुरुषो ब्रह्मरूपो भवतीत्यर्थः । हीति विद्वत्प्रसिद्धौ । तत्र सर्वलोकप्रसिद्धं दृष्टांतमाह—भ्रमरकीटवदिति । भ्रमरेण कुतश्चिदानीय

जीवन्नेव स्वकुड्यां प्रवेशितो यः कीटः स यथा भयात् भ्रमर-ध्यानेन भ्रमर एव भवति तद्वदिति ॥ १४० ॥

निश्चयात्मा पुरुषकी तीव्रभावना करके जो मनुष्य जिस वस्तुकी चिन्ता करे है शीघ्र ही भ्रमरकीटकी तरह तद्रूप हो जाय है । जैसे भ्रमरकीट कीडाविशेष होय है, वह अपने स्थानमें जिस दूसरे कीडेको लाके धरे है वह लाया हुआ कीट भयके मारे भ्रामरकीटका विचार करे है, विचार करते २ तद्रूप हो जाय है ऐसी लोकमें प्रसिद्धि है, इसी प्रकार पुरुष ब्रह्मका विचार करता करता तद्रूप हो जाय है ॥१४०॥

प्रपंचमें ब्रह्मरूपकी भावना।

अदृश्यं भावरूपं च सर्वमेव चिदात्मकम् ।
सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥१४१॥

यदि पूर्वश्लोकोक्तदृष्टांते भावनाबलादेवान्यस्यान्यत्वं भवेत् तर्हि ब्रह्मविवर्त्तत्वेन ब्रह्मरूपस्य विश्वस्य ब्रह्मभावनया तद्रूपता भवेदिति किमु वक्तव्यमित्याशयेन सर्वात्मभावनामाह--अदृश्य-मिति । अदृश्यं परोक्षं भावरूपं प्रत्यक्षं च सर्वं विश्वम् । यद्वा अदृश्यं द्रष्टृरूपम्, भावरूपं दृश्यम् । चकाराद्दर्शनम् । एतत्सर्वं त्रिपुट्यात्मकं जगद्भ्रांत्याऽऽत्मभिन्नत्वेन भासमानमपि चिदा-त्मकं निर्विशेषस्फुरणमात्रस्वरूपं स्वात्मानमेव बुधः अद्वैतज्ञान-निष्ठः सावधानतया स्थिरवृत्त्या नित्यं भावयेत्, सकलमिदमहं च ब्रह्मैवेति सर्वदा पश्येदित्यर्थः ॥ १४१ ॥

ज्ञानी पुरुष सदा ही सावधान होकर अदृश्य दृश्य सम्पूर्ण संसारको चिन्मय ब्रह्म चिन्तना करै ॥ १४१ ॥

दृश्यं ह्यदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत् ।
विद्वान्नित्यसुखे तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥

एतदेव विवृणोति–दृश्यमिति । दृश्यं घटादिकमदृश्यतामधिष्ठानचिद्रूपतां नीत्वा । हीति विद्वत्प्रसिद्धौ । ब्रह्माकारेण कल्पितस्य परिच्छिन्नस्य नामरूपादेर्निवृत्तिपूर्वकं बृहदाकारेण परिच्छिन्नरूपेण चिंतयेदित्यर्थः। ततः किमत आह–विद्वानिति। चिद्रसपूर्णया चिदेव रसश्चिद्रस श्चिदानंदस्तेन पूर्णया धिया नित्यसुखे अविनाशिसुखे विद्वांस्तिष्ठेदिति ॥ १४२ ॥

दृश्य वस्तुको अदृश्यकी तरह करके ज्ञानी पुरुष ब्रह्मस्वरूप चिन्तना करे, तिस चिन्मय ज्ञानके होनेसे विद्वान् पुरुष चिन्मय रससे भरी हुई बुद्धिसे नित्य सुखसे आस्थान करै ॥ १४२ ॥

राजयोगका उपसंहार ।

एभिरंगैः समायुक्तो राजयोग उदाहृतः ।
किंचित्पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥

इदानीमुक्तं स्वाभिमतयोगमुपसंहरति–एभिरिति । किंचित्स्वल्पं पक्वाः दग्धाः कषाया रागादयो येषां तेषां हठयोगेन पातंजलोक्तेन प्रसिद्धेनाष्टांगयोगेन संयुतोऽयं वेदांतोक्तो योग इति । शेषं स्पष्टम् ॥ १४३ ॥

इन अङ्गोंसे युक्त योगको राजयोग कहै हैं, जिनका विषयोंमें राग नहीं रहे है तिस पक्षमें हठयोगयुक्त योग ही राजयोग कहावे है ॥१४३॥

राजयोगके अधिकारी ।

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवता
विरचिताऽपरोक्षानुभूतिः समाप्ता ।

अयं राजयोग एव केषां योग्य इत्याकांक्षायां सर्वग्रंथार्थमुपसंहरन्नाह—परिपक्वमिति । येषां मनः परिपक्वम्, रागादिमलरहितमिति यावत् । तेषामित्यध्याहारः । तेषां जितारिषड्वर्गाणां पुरुषधुरंधराणां केवलः पातंजलाभिमतयोगनिरपेक्षः अयं वेदांताभिहितो योगः सिद्धिदः प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्तिप्रदः । चकारोऽवधारणे । नान्येषामपरिपक्वमनसामित्यर्थः । ननु परिपक्वमनस्त्वमतिदुर्लभमित्याकांक्षायामस्यापि साधनत्वादतोऽप्यंतरंगसाधनमाह—गुरुदैवतभक्तानामिति । जवादतिशीघ्रमित्यर्थः । सर्वेषामिति वर्णाश्रमादिनिरपेक्षं मनुष्यमात्रं ग्रहीतव्यम्, अतएव गुरुदैवतभक्तेरंतरंगत्वम् । तथाच श्रुतिः—"यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः" इति । स्मृतयश्च—"तद्विद्धि प्रणिपातेन । श्रद्धावाँल्लभते ज्ञानम्" इत्याद्याः । अयं भावः—परिपक्वमनसामपि दुःसाध्यानि साधनानि गुरुदैवतभक्तानां सुसाध्यानि भवंतीति हेतोर्गुरुदैवतभजनमेव स्वधर्माविरोधेन सर्वैः कार्यमिति परमं मंगलम् ॥१४४॥
पूर्णयमापरोक्ष्येण नित्यात्मज्ञानकाशिका । अपरोक्षानुभूत्याख्यग्रंथराजप्रदीपिका ॥१॥ नमस्तस्मै भगवते शंकराचार्यरूपिणे । येन वेदांतविद्येयमुद्धृता वेदसागरात् ॥ २ ॥ यद्ययं शंकरः साक्षाद्वेदांतांभोजभास्करः ॥ नोदेष्यत्तर्हि काशेत कथं व्यासादिसूत्रितम् ॥ ३ ॥ अत्र यत्संमतं किंचित्तद्गुरोरेव मे नहि ॥ असंमतं तु यत्किंचित्तन्ममैव गुरोर्नहि ॥ ४ ॥

यत्प्रसादादहंशब्दप्रत्ययालंबनो हि यः ॥ अहं स जगदालंबः कार्यकारणवर्जितः ॥५॥ तस्य श्रीगुरुराजस्य पादाब्जे तु समर्पिता । दीपिकामालिका सेयं तत्कृपागुणगुंफिता ॥६॥ योऽहं स्वाज्ञानमात्राज्जगदिदमभवं खादिदेहांतमादौ, स्वस्वमादिव देव ! सोऽहमधुना स्वज्ञानतः केवलम् ॥ ब्रह्मैवास्म्यद्वितीयं परमसुखमयं निर्विकारं विबाधं, जाग्रत्स्थानवदेव देवगुरुसत्स्वल्पप्रसादोत्थितात् ॥ ७ ॥

इति श्रीपरमहंसपरिव्राजकाचार्य–श्रीविद्यारण्यमुनि-
विरचिताऽपरोक्षानुभूतिदीपिका समाप्तिमगमत् ॥

जिनका मन परिपक्व होजाय है उनको केवल यही योग सिद्धिको देय है और जिनकी गुरु और देवताओंमें भक्ति होय है उनको यह योग अति सुलभ होय है ॥ १४४ ॥

इति रुहेलखण्डान्तःपातिरामपुरवास्तव्यश्रीयुतभोलानाथा-
त्मजपण्डितरामस्वरूपद्विवेदिगौडविरचितभाषया-
समलंकृता (श्रीशंकराचार्य्य विरचिता)
अपरोक्षानुभूतिः समाप्तिमफाणीत् ।

पुस्तक मिलनेका ठिकाना–

खेमराज श्रीकृष्णदास, "श्रीवेंकटेश्वर" स्टीम्–प्रेस, बम्बई.	गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" स्टीम्–प्रेस, कल्याण–बम्बई.

अपरोक्षानुभूतिः।

२५६